

Parameshwar tantra
परमेश्वरतन्त्र
Sanskrit
Paper, Handwritten
N. A.
Folio: 136 (folio No-1 missing)
12" x 4.2"
Incomplete

पारमेश्वरतन्त्र

तद्भेदमपि वक्ष्यामि तच्च पंचविधं मतं १३ गोपालं नारसिंहं च रामं कृष्णात्मकं परं ना
रायणमिति प्रोक्तानि गायत्री वैष्णवी तथा १४ अथ वक्ष्ये गिरिसुते मतं मम महत्तरं शैवं
सप्तविधं पुण्यं वीरशैवादिभेदतः १५ वीरशैवं तथा नांदि शैवमादिपदं ततः अनुशैवं
महाशैवं योगशैवं तु षष्ठमं १६ सप्तमं ज्ञानशैवाख्यं तत्र सर्वोत्तमोत्तमं वीरशैवमितीशा
नि तदंगानीतराणि तु १७ गाणपत्यं वैरभद्रं भैरवं शारभाभिधं नांदिकेशं च कौमारं
पैशाचमिति सप्तधा १८ अष्टकोटिमहाभेदं गाणपत्यमतं प्रिये सप्तधा वीरभद्राख्यं
भैरवं चाष्टधोदितं १९ शारभंच द्विविधं नांदिकेशं च त्रिविधोदितं कौमारमिति पैशाचं

२ मतंतुत्रिविधंप्रिये २० सौगतांदीनियावंति वैष्णवांतमतानितु पञ्चशैवंममतंसर्वं
षामुत्तमोत्तमं २१ तंत्रंतुषड्विधंप्रोक्तं षड्दर्शनविभेदतः वीरशैवंवैष्णवंच शाक्तंसौरंवि
नायकं २२ कापालमितिविज्ञेयं दर्शनानिषडेवहि तत्तत्तंत्रोक्तमार्गेण तत्तत्कर्मसमाचे
रेत् २३ शैवंपाशुपतंसोमं लाकुलंचचतुर्विधं शैवभेदमितिज्ञेयं संकरंनसमाचरेत् २४
अनादिशैवः प्रथम आदिशैवोद्वितीयकः तृतीयस्तुमहाशैव श्चतुर्थोह्यनुशैवकः २५ पं
चमोवांतरंशैवो योगशैवस्तुषष्ठकः सप्तमोवीरशैवाख्य स्ततत्कर्मसमाभेत् २६ तत्तदा २
गमकर्माणि तत्तद्दैवंनामिश्रयेत् गोपालंपांचरात्रंच नारसिंहंचवैष्णवे २७ नारायणे २
पंचविधं संकरंनसमाचरेत् नित्यानित्याशावराख्या शक्तीश्चेतिचतुर्विधा २८ शाक्त

भेदमितिज्ञेयं संकरंनसमाचरेत् ब्रह्मेंद्रः सावनःसूर्य इतिसौरश्चतुर्विधः २९ तस्मिन्
तस्मिन्यथाप्रोक्तं तत्तदेवंनमिश्रयेत् अर्हश्चार्वाकबौद्धश्च जिनश्चेतिचतुर्विधा ३० वैनाय
कमितिज्ञेयं संकरंनसमाचरेत् निरीश्वरंसेश्वरंच कापालंभैरवंतथा ३१ चतुर्विधंतु
कापालं संकरंनसमाचरेत् अत्रादौवीरशैवाख्यं तंत्राणामुत्तमोत्तमं ३२ तत्रतंत्रोमहादेवि
शैवंपंचाक्षरोमनुः तदुद्धारंप्रवक्ष्यामि शृणुशैलकुमारिके ३३ जविपूर्वंमरुत्पूर्वं स्मरपू
र्वंसमन्वितः पार्श्वमक्षिसमायुक्तं वरुणस्थधनुःप्रिये ३४ वह्निपूर्वंततोदेवी मंत्रःसाक्षा
न्मदात्मकः सर्वेषामपिशैवानां सर्वसाधारणोमनुः ३५ देव्युवाच उक्तान्येतानिदेवेश स
र्वाणिचसमानिवा तारतम्यंनवातत्र किंमतंसर्वशेखरं ३६ नोक्तंत्वात्क्रमतंदेवब्रूह्युत्तमं

वाधमंसमं तदृष्टाकथयस्वामिन् यत्तुसर्वोत्तमोत्तमं ३७ ईश्वरउवाच सर्वाणिचमहादेवि
३ मतानिचमहांत्यपि प्राप्यमेकंफलंतेषां विशेषस्तत्रवक्ष्यते ३८ चित्तापांसमलायत्तत्सा
ध्यान्यन्यानिपार्वति महाफलंशुभंकरं शैवमेवनसंशयः ३९ तत्रवक्ष्येशिवेवीरशैवंस
र्वोत्तमोत्तमं नान्यस्यतद्भवेद्योग्यं व्यक्तयेसर्वसम्मतं ४० वीरशैवमतंसत्यं भोगमोक्षैक
साधनं सर्वोत्तमंममम तं यतःसर्वोत्तमोस्म्यहं ४१ नवीरशैवसदृशं मतमस्तिजगत्त्रये
सर्वभोगप्रदंपुण्यं शिवसायुज्यदायकं ४२ यथामत्सदृशोनास्ति पुरुषाणांत्वयासमा स्त्री ३
णां तथावीरशैवसदृशंनास्तिवैमतं ४३ अपिपापशतंकृत्वा ज्ञानतोज्ञानतोपिवा वीर
शैवमतंप्राप्य शिवएवनसंशयः ४४ नतस्या[illegible]भयंपापा न्नाधिकंपुण्यकर्मणः स्व

येहिपुण्यपापानांनिर्नेताचनियामकः ४५. येवीरशैवेदेवेशि दीक्षिताःशिवयोगिनः तान्
दृष्ट्वैवपलायंतेदूरतोयमकिंकराः ४६ सभस्मरुद्राक्षतनुंसलिंगशिवयोगिनं दृष्ट्वासद्यो
विमुच्यंतेपापिनोपिनसंशयः ४७ यस्यभस्मललाटेस्ति कंठेलिंगमदात्मकं रुद्राक्षधार
णंदेहेसोहंदेविनसंशयः ४८ यइच्छेन्ममसारूप्यं सोर्चयेच्छिवयोगिनं यइच्छेद्रौरवंघो
रंसनिंदेच्छिवयोगिनं ४९ निसंपथ्येद्वीरशैव दीक्षितंशिवयोगिनं यस्यकंठगतोहंवैस
तस्मादुत्तमःप्रिये ५० याद्दृशीभावनाकार्या मयित्वयिशिवेतथा तथैवकार्यावैवीरशैव
दीक्षितउत्तमे ५१ तस्यपुण्यममप्रिये तन्निंदाचममैवहि यश्चास्तिमयिसद्भक्तिः सर्वेयच्छि
वयोगिनं ५२ निमिषंनिमिषार्धंवा यत्रास्तुःशिवयोगिनः तत्कैलासपरंविद्धि तत्रकाशी

४ शिवोप्यहं ५३ ममयोधारयेल्लिंगं यथोक्तं गुरुणा शिवे चांडालस्पृष्टदोषोपि स्मरतो नश्य
तिक्षणात् ५४ न तस्य जातिभेदोस्ति नशुच्यशुचिकल्पना नस्पृष्टिर्नापि वाशुद्धिः सर्वं शिव
मयं ततः ५५ भुक्त्वा वणिष्टपात्रं च तदुच्छिष्टं घिया शिवे क्षालयेच्छिवयोगी यः स याति नरकं ध्रु
वं ५६ नस्पृष्टिर्न रजोदोषं नस्त्रीबालादिकल्पना नजन्ममरणाशौचं नस्नानादिर्विधेयता ५७
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्यजातयः लिंगधारणमात्रेण शिव एव न संशयः ५८ स्त्रि
यो बालास्तथा वृद्धाः खंजाः कुब्जांधपंगवः उन्मत्ता बधिराः काणाः षण्ढा धूर्ताश्च वंचकाः ५९ राः
चोरा जारास्तथा वेश्या चांडालांतसंभवा मल्लिंगधारणादेव मद्रूपा एव ते शिवे ६० न बाल
वृद्धभेदोस्ति नमस्कारादिपूजने सर्वैरपि वंदनीया हि शिवाः पुंस्त्रीमुखाः ६१ यस्यास्ति ४

भक्तिरीशानि वीरशैवमतांश्रये भक्तिमात्रपवित्राहि सर्वएकाधिकारिणः ६२ देव्युवाच जय
शंकरसर्वेश सर्वज्ञासकलोत्तम मतेतुवीरपूर्वेसे किंप्रमाणमिहोच्यतां ६३ यौगिकंरूढिकंवेद
पुष्पचारोशिवाप्रभो तदद्य कथयेशान नास्तिनान्यस्यचेदृशं ६४ ईश्वरउवाच साधुपृष्टंत्वयादे
वि सर्वलोकहितंत्विदं महारहस्यंतत्ते वक्ष्येमोहवशार्दितः ६५ वीरत्वनामविश्वेशि तुरीयो
पत्रयत्रवै गुरूत्कमार्गनिरता मतेवीरपदाभिधे ६६ सर्वेपिवीरादेवेशि तुरीयायत्रयत्रये
किंतुमेशैवभेदोयो वीरशैवःसउच्यते ६७ अन्यत्रकर्मबाहुल्या दाचारस्यव्यतिक्रमात् नचि
न्मुख्यलाभाञ्च भेदःसद्भावनःस्मृत ६८ अत्रवक्ष्येविशेषंते लिंगधारणवैभवात् भक्तिमा
त्रेण कल्याणि स्मृखदुःखांबुधिंतरेत् ६९ प्रवेशमात्रेणमते ममशैवेमनोत्तमे अनायासे

५ नसुसुरव लिंगधारणवैभवात् ७० अन्यत्र नास्ति मल्लिंगं धारणं मत्तवर्तिकं शैवंलभवतु
वीत लिंगधारणमीश्वरि ७१ मतोनरस्त्वोपामूढः कुर्यान्मल्लिंगधारणं सजीवन्नेवचांडा
लो मृतोनरकमश्नुते ७२ योविनागुरुकारुण्य मिच्छयालिंगधारणं सजीवन्नेवचांडालो
मृतोनरकमश्नुते ७३ योन्यधर्मः परंधर्म माचरेदिच्छयान्वितः सजीवन्नेवचांडालो मृतोनरक
मश्नुते ७४ यदिभक्तिरीदृशादेवि ममलिंगस्यधारणे शिवयोगिनमाश्रित्य तंगुरुंशिवमर्चये
त् ७५ शिवदीक्षांविनादेवि यः कुर्याल्लिंगधारणं सयातिनरकंघोरं यस्यचेतदभक्तितः ७६
विनाविधानमीशानि नकुर्याल्लिंगधारणं कृतंचेत् कृतंविधि नतच्छैवमतंभवेत् ७७ लिं
गधारणमात्रेण शिवत्वंप्राप्तिरेवहि शैवंममम तंदेवि सद्योभुक्तिविधायकं ७८ तस्माद्धे ५

वमंतःसर्वमंत्रानामुत्तमोत्तमं ममस्वरूपं देवेशि मल्लिंगस्य यथार्णात् ७९ विनानानुग्रहं
तेषां ममशैवमतेशिवे भक्तिंसंपद्यतेक्कापि तत्पुनर्भवभाजनः ८० सहस्रवेश्यचनरो गते
षुबहुजन्मसु ममशैवमतेदेवि सोहमेवनसंशयः ८० यथानदीनांसर्वासां पुण्याभागीरथी
शिवे यथैवभवतीसर्वयोषितांपुरुषेष्वहं ८१ यथैवकाशीक्षेत्राणां तीर्थेषुमणिकर्णिका
ममपंचाक्षरीमंत्रःसर्वमंत्रेषुवैयथा ८२ तथैवसर्वलोकेषु कैलासस्थानमावयोः तथाशैवम
तंदेवि विद्धिसर्वोत्तमोत्तमं ८३ ममसर्वोत्तमत्वेन मत्सृष्टत्वात्सरेस्यच तद्देवतारतम्यंतेमते
ममपरत्रतु ८४ यथावर्धयतेराजा भृत्यंकर्मानुसारतः तारतम्यपदंदत्वा तथैवाहंमतेमम ८५
विशेषंतत्रवक्ष्यामि रहस्यंगोप्यतोत्वया ८ प्रेने कापायकुत्रापि विनाभक्तस्यलक्षणं ८६

६ देवालयादिषुयथा चित्रादिषुयथागृहे दृश्यतेचाकृतिर्यस्य तद्ध्यानंजायतेस्फुटं ८७ एवंत्व
मत्तादन्यत्र सर्वपापैःप्रमुच्यते लिंगस्यदर्शनाद्देवि ममज्ञानं प्रजायते ८८ गतेषुबहुसंख्येषु
दुःखरूपेषुजन्मसु मत्कारुण्येनतस्यांते जायतेलिंगदर्शनं ८९ यदेतमितिजानाति लिंगं
ममममहेश्वरि मद्ध्यानाद्दर्शनात्सद्यो मल्लिंगस्यवसोस्म्यहं ९० एवंहिमहिमादेवि ममलिंग
स्यकिंपुनः धृतेतुतस्मिन्नुत्पत्तनौ सर्वालिंगमयीतनुः ९१ लीनार्थकमपि त्वीप्सि यत्तलिं
गमुदाहृतं तल्लिंगमयमित्येन च्छरीरंतस्यधारणात् ९२ देव्युवाच वृषध्वजंवृषारूढ विरूपाक्ष
विषादने नतेकुर्वंतिकिंसर्वे लिंगधारणमीश्वर ९३ ईश्वरउवाच कथंभविष्यतिप्रोवे ति
नामक्रूराणांनृणां कर्मभूरितदृष्टीनां मन्मायामोहितात्मनां ९४ तदनुष्ठानमात्रेण विधूया ६

खिलबंधनं सर्वकल्याणनिलयं ममसायुज्यमेतिसः ९५ ज्ञानतोऽज्ञानतोवापि शक्त्याशक्त्यादि
नापिवा यन्न्यूनमतिरिक्तंवा वस्थात्रययुतोपिवा ९६ त्रिगुणांयातिसद्रूप्यं शैवस्यशिवयोगिनः
सकृल्लिंगार्चनेनैव यत्तद्रूपंमहेश्वरि ९७ सर्वत्रममदर्शित्वं भक्तिरेकांतरूपिणी मन्मतस्थेवम
हासे द्वयमेवहिसाधनं ९८ नपुष्पिणीं त्यजेत्पूजां नभुक्त्वानाशुचिस्त्वपि यदैवपूजयेल्लिंगं त
दानुग्रहकोस्म्यहं ९९ स्मरणात्कीर्तनाद्देवि ममलिंगस्यधारणात् अनायासेनातिशायं फलं
स्यादुत्तमोत्तमं १०० नमेस्तियस्मिन्कारुण्यं नतस्यात्ररुचिर्भवेत् यदेवस्यादत्ररुचिस्तदासु
क्तोनसंशयः १ अतोममरहस्यंहिमतमेतन्महत्तरं शैवैर्धीरत्वमात्रेण किंपुनर्लिंगधारणात्
२ यथैवदर्शनाल्लोके शिखरस्यशिवालये नश्यंत्यनेकपापानि शिवत्वज्ञानसंभवात् १०४

> पाशुपतंवेति यदेकेनाम
> भेदनः २ तत्रसत्यविशे
> षतु वीरशैवंमहत्तरं शैवे

७ तथैव दर्शनाल्लिंगधारिणः शिवयोगिनः सद्यो नश्यंति पापानि तमः सूर्योदये यथा ५ अत एव म
हादेवि गुह्यं मतमिदं कलौ मन्मतज्ञानमात्रेण मुच्यते सुरपि पापिनः ६ लाभः शैवमतस्यैको वीरशै
वप्रवर्तनं भक्तिभूतदयाचेति मह्येवल्यं चतुर्विधं ७ यदि नास्त्यधिकं मत्तस्तदास्यान्न मन्मता
त्परं यदि स्यान्मत्परं देवि मत्सा ते त्यं कुतस्तदा ८ इत्यं ते कथितं देवि मतभेदमतः परं तारतं
म्यफलं चापि किं भूयः श्रोतुमिच्छसि ९ इति श्रीपारमेश्वरतंत्रे शिवाद्वैतसिद्धांते वीरशैवदी
क्षाप्रकरणे मतभेदनिरूपणं नाम प्रथमः पटलः १

श्रीरामचंद्राय नमः श्रीगुरुभ्यो नमः त्र्यंबक नमस्तेस्तु त्रिपुरघ्न यमांतक वदमे करुणासिंधो ७

लिंगधारणलक्षणं १ दीक्षादिक्रमशः सर्वं सज्जिकादिगुणाधिकं शिवाग्निजननंचापिसर्वं
विस्तरतः प्रभो २ ईश्वरउवाच श्रृणुदेवि प्रवक्ष्यामि लिंगानांभेदमादितः दीक्षायाः सज्जिकादे
श्च सर्वंनिगदितोमम ३ ममलिंगमिदंसर्वं जगत्स्थावरजंगमं ममलिंगमिदंविद्धि पाषाणादि
विनिर्मितं ४ नादेयंशैलसंभूतं पुण्यक्षेत्रसमुद्भव गंगोद्भवंसागरजं लिंगंतन्ममसंमतं ५
यद्देविशिवनाभाख्यं लिंगंतत्परमुत्तमं यद्दीयतेहिगुरुणा लिंगंसर्वोत्तमोत्तमं ६ कामान्यन्या
निलिंगानि तत्तदिष्टार्थदानिहि सौवर्णंपारदादीनि स्थूलंस्थूलंप्रशस्यते ७ क्रमुकाकृतिमा
रभ्य यावदिच्छास्तिधारणे उत्तरादुत्तराच्छ्रेष्ठं ममलिंगमहेश्वर ८ पारदंसर्वकामाय सौवर्णंवित्त
कामिनः राजतंतुप्रजाकामि तांम्रंशत्रुविनाशनं ९ त्रपुजंरोगनाशाय सीसकंपापनाशनं स्फाटि

८ कं ज्ञानदं पुण्यं रुद्राक्षं मोक्षदायकं ५० दारुजं सर्वनाशाय कांस्यं रोगार्तिदायकं श्रीशैलजं महा
देवि हैहिकामुष्मिकप्रदं ५१ सर्वोत्तमोत्तमं लिंगं सर्वाभीष्टार्थदायकं यद्दत्तं गुरुणा देवि लिंगं
तदहमेव हि ५२ बदरीफलमानं तु स्फूतं धर्माभिवृद्धिदं कमुकीफलमानं तु धत्तुः सर्वार्थदायकं ५३
जंबीरफलमानं तु सर्वकामार्थदायकं ततोधिकं प्रियं पावश्चतुर्वर्गफलप्रदं ५४ न प्रमाणं त
दं तस्य शिवनाभस्य पार्वति यद्दत्तं गुरुणा तस्य सर्वलक्षणलक्षितं ५५ सर्वैश्वारणं देवि सर्व सा
सौभाग्यदायकं सर्वसिद्धिकरं लिंगं यच्च पाषाणनिर्मितं ५६ सर्वोत्तमोत्तमं लिंगं यच्च श्रीशै
लजं शिवे दोषाश्च बहवः संति हृद्यादीनि धरात्मजे ५७ अन्यलिंगेषु सर्वेषु नैव पाषाणसंभ ६
वे जातके मृतकाशौचे मलमूत्रविसर्जने ५८ रजोवस्थायामुद्योगे रणे निद्रादिषु प्रिये कर्मणाम ८

नसावाचा जाग्रत्स्वप्नसुषुप्तिषु १९ नलिंगमुत्सृजेत्क्वापि प्राणैः कंठगतैरपि नपूजापिपरि
त्याज्या रुक्षेपि कुलनायके २० नसहत्स्मरणं वापि ममलिंगस्य सद्गुरोः तेष्वेकतममादाय
लिंगस्वाभिमतंशिवे २१ धारयेदात्मनादात्म्यं प्राणलिंगंममेतितत् अथकुर्यान्महादेवि स
ज्जिकारव्यंतदालये २२ यथास्थिरस्यलिंगस्य तद्वदेवचरस्यच स्थिरलिंगालयेदेवि प्रसिद्धं
दृष्टलक्षणं २३ जानास्येतत्स्वरूपंच चरलिंगस्यशांकरि लक्षणंपूजनविधि मावारंलिंगधारि
णां २४ क्रमेणशृणुतत्सर्वं तारतम्यफलंशिवे स्थिरलिंगार्चकालोके नशुध्याः पंक्तिकर्मसु २५
धृतलिंगार्चकाः सर्वे पावनाः पंक्तिकर्मसु पृथक्स्थलांच्चलिंगस्य स्वदेहस्याम्यशुद्धिजं २६
पृष्टंुनयोग्यतालिंगं नत्वेवंशिवयोगिनः धृतलिंगशरीरत्वात्सदातत्ज्ञानसंभवात् २७ शु

९ चिरंवसदा तस्य नभुवि नैव चा भुवि: गच्छन्तिष्ठन् स्वपन् भुंजन् जाग्रन्नपि हसन्नपि २८ खाद
न्पिबन् प्रयातो वा लिंगपूजां समाचरेत् यथोपाविष्टपीठादौ शिवयोगी प्रवर्तते २९ तथोप
विष्टयेवासौ धावन्भुंजितवानपि नकायक्लेशसहनं नोपवासादिपीडनं ३० यथेच्छामपि भुं
जानो भोगान्लिंगं समर्चयेत् दयाभूतेषु मद्भक्तिः सर्वत्र ममदर्शनं ३१ मल्लिंगधारणं नित्यं मुक्ति
रेषा चतुर्विधा तस्मात्सोलभ्यमीशानि नान्यस्य योगिनां ३२ मतस्य मम चान्यस्य मन्मते लिं
गधारणात् तस्य लिंगस्य विश्लेषे वरं कुर्याच्छिवालयं ३३ पंचसूत्रोक्तलिंगस्य यावत्पूर्णं तथा
भवेत् सौवर्णमुत्तमं देवि यदि शक्तिस्तथाचरेत् ३४ राजतं पित्तलं ताम्रं नैव कांस्येन कारयेत्
सीसेन त्रपुणा देवि तां नवीपाटिकापि वा ३५ एतेष्वन्यतमं नित्यं नान्यत्कुर्याद्दनादपि परिस्व ९

व्यापियत्नेन प्राणमानधनादिकं ३६ संरक्षणीयं गिरिजे लिंगमेव न संशयः संभाविते न द्रव्येण
विना तं तु पठेद्ध्रुवं ३७ कर्कटी धात्रीफलैरन्यैः यथाकामफलप्रदा पंचसूत्रप्रमाणेन सज्जिकालिंगरू
पिणी ३८ तादृशस्य च लिंगस्य भोगमोक्षैकसाधनी भोगस्वर्गापवर्गाय मम नंदीश्वरा कृतिः ३९
भोगमोक्षैकफलदा सज्जिकार्कफलाकृतिः आयुरारोग्यफलदा यासाचूतफलाकृतिः ४० आयु
ष्मत्पुत्रसौभाग्यफलदा मोदकाकृतिः ऐश्वर्यविजयायुष्यतेजः प्रज्ञाविलासकृत् ४१ सज्जिका
शिवलिंगस्य बिल्वीफलसमाकृतिः शिवलिंगाकृतिः सज्जा भोगमोक्षैकसाधनी ४२ यथेदि
ष्टतमं देवि भूषणं मणिकांचनं तदेव सज्जिकां कृत्वा सर्वकामं समश्नुते ४३ चतुरस्रं पंकजाभं वा
वर्तुलं बिंबकोपमं यथासंदर्शितं देवि गुरुणा तत्तथाचरेत् ४४ एकद्वारकपाटाढ्या पादत्रितये

१० शोभिनी संनद्धगुणसंबद्धा दृढासंतानशोभिनी ४५ सौवर्णस्याद्धदिगुणः सर्वसौभाग्यदायकः
राजतः पुत्रकीर्तिः स्यात्तांमस्त्वधनधान्यकृत् ४६ पैत्तलस्सर्वभोगाय कांस्यंकल्मषनाशने त्र
पुसीसमयोवापि सर्वाभीष्टफलप्रदः ४७ दारिद्र्यापघसंविघ्नि पट्टजः सर्वदुःखकृत् कार्पटः सर्व
भोगाय तांतवीसर्वकामदः ४८ मुक्तोशानपदस्तत्रैरक्तोवश्यकरोगुणः श्यामः शत्रुभयकरः
पीतः पुत्रप्रदायकः ४९ चित्रोविचित्रफलदः सुहृदश्छेदवर्जितः अगंधिरुक्तरूपः स्याद्दाना
न्याकंठमध्यगः ५० यावद्दिक्षाभवेद्देवि सज्जिकागुणउत्तमः तावदेवप्रकुर्वीत सज्जिकागुण
मीश्वरि ५१ यासज्जिका भवद्रूपा मद्रूपोयोगुणः शिवे उभयोरावयोर्योगा जगदेतच्चराचरं ५२
पुंरूपमखिलंदेवि ममरूपंनसंशयः स्त्रीरूपमखिलंदेवि तवरूपंनसंशयः ५२ मयाविनाकः १०

चिन्नास्ति तवरूपं तथा मम तदेवरूपलाभाय गुणयोगः प्रकीर्तितः ५३ शिवस्यैंभवेद्वार मेकं २
स्यादेकमेवहि सार्गलं तिर्यगरं सर्वमेकात्मिकं शिवे ५४ यस्यद्वारयुगे देवि गौरीकात्यायनी क्रमे
पार्श्वयोः शांकरी रौद्री भद्रकाल्युपरिष्टधः ५५ यस्याः पादत्रयं धर्मकामार्थात्मकमीश्वरि यस्या
मदात्मकगुणो भोगमोक्षफलात्मकः ५६ गुणस्याग्रद्वयोरेव संबधौ द्वौ सवर्तुलौ पद्मकुड्मलसद्रूपौ
प्रोक्तौ ज्ञानक्रियेति च ५७ तदुपर्येकमीशानि चित्रनेकं स्वरूपकं आत्मपूर्वागमाकुंचह्यात्मागम
वकुंचयेत् ५८ पार्श्वद्वयाग्रे संयोज्य ययोतं गुरुणा ततः उक्तमेवं मया लिंगं सज्जिकागुणलक्षणे ५९
तद्धारणक्रमं वक्ष्ये दीक्षापूर्वं सविस्तरं यस्तु मत्करुणापात्रं चरमं जन्म यस्य वा ६० तस्यैव जायते
भक्तिर्मम लिंगस्य धारणे निर्विष्टविषयः शांतः सर्वत्रसमदर्शनः ६१ मुमुक्षुरीश्वरे भक्तः श्री

११ गुरुं शिवमाश्रयेत् सर्वलक्षणसंपन्नं सर्वज्ञं सर्वसंमतं ६२ सदाचाररतं शुद्धं शिवभक्तमलो
लुपं यथार्थवादिनं शांतं द्वेषासूयाविवर्जितं ६३ विदिताखिलशास्त्रार्थं मिंगिनक्षमव्याकुलं आ
नाथातुरमात्मज्ञमकामुकमवंचकं ६४ वाग्मिनं शिवतत्वार्थबोधकं दृढमानसं एतादृशगुणोपेत
मुपेयाद्गुरुमीश्वरं ६५ रिक्तहस्तेन नोपेयात् उपसर्पेद्गुरुं शुचिः नमस्कृत्य विधानेन साष्टांगं भ
क्तिपूर्वकं ६६ कृतांजलिपुटः स्थित्वा स्तुत्वा विज्ञापयेत्ततः नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ६७
देहि शिष्याय मे वीर शैवदीक्षामभीष्टदां इति पृष्टोथ शिष्येण यदि दातुमना गुरुः ६८ विशोध्य ष
ट्त्रिंशत्तत्वमध्वानं दीक्षयेद्बुधः कृपालुः श्रीगुरोर्भक्तं श्रीगुरोः प्रियकारिणं ६९ कर्मणा मनसा वाचा
कायेनानुचरं सदा गुरुमंत्रात्मदेवेषु तथैवासनमुद्रयोः ७० अभेदभावनाधीरं सत्यवादिन ११

मास्तिकं प्राणार्थमानवस्तुभिः मनोवाक्कायकर्मभिः ७१ सर्वदा सर्वभावेन गुरुशुश्रूषणेरतं अप्र
मत्तमुदारांगं दृढचित्तमनामयं ७२ असत्यवादरहितमवंचकमदुर्हृदं अनार्थालोभमर्यादयं मृदु
संभाषणप्रियं ७३ इत्यादिगुणसंपन्न मथतं दीक्षयेच्छिवे हस्तमस्तकसंयोग मावरे [illegible] स्मरेत् ७४ रं
अस्तु तिष्ठ व्रोवाहेति स्वांगीकुर्याद्गुरुस्ततः यः सदा गुरुसेवायामप्रमत्तो जितेंद्रियः ७५ मुक्तिमु
क्तिफलप्राप्त्यै सेवेदी प्राधियागुरुं नलंघयेद्गुरुच्छायां मात्मच्छायां तथागुरो ७६ प्रसारयत्सयेत्ले
न प्रोष्ठाभूष्णुः कदाचन उच्चासनं नसेवेत नोच्चभूया तदग्रतः ७७ नचेष्टयेद्यथासेष्टं नान्य
गोष्ठि समाश्रयेत् ७८ नगुरोरग्रतो गच्छे न स्वपेद्गुरुसंनिधौ ७८ सहश्रीगुरुणा प्रोष्ठो नकुर्यात्क्र
यविक्रयं नाश्वेद्धसेन्न प्रलपेन्नोपविश्येत्तदग्रतः ७९ मुखावलोकि सेवेत स्वप्रसन्नमनोगु
रुः रुष्टेपि नाप्रसन्नः क्लेशं तदग्रे संप्रकाशयेत् ८० शय्यावासनवस्त्रादि यत्नस्पृष्टं तु पूजयेत्

१२ पादुकावाहनादीनि नापसव्यं व्रजेद्गुरोः ८१ समर्प्य गुरवे भीयाच्च यद्दिष्टं तथासनः भावयेच्छ्री
गुरोरूपं जगदेतच्चराचरं ८२ संस्मरेच्छ्रीगुरोर्नाम जाग्रत्स्वप्नसुषुप्तिषु कर्तव्ये तु नमस्कारे जेष्टु
ज्यशिवादिषु ८३ प्रणमेच्च त्र कुत्रापि गुरुमेव हृदिस्मरन् इत्यादिगुणसंपन्नमुपपन्नं स्वभक्तितः ८४
परिगृह्य गुरुः शिष्यं शिवदीक्षासु योजयेत् ईशोर्जमार्गशीर्षेषु तपस्यपि तपस्यके ८५ माधवेशु
व क्लपक्षे तु पूर्णास्कं विशेषतः जयास्कं शिवदीक्षायामुत्तरोत्तरवृद्धिकृत् ८६ पंचम्यां तु प्रजावृद्धि
दशम्यां पशुवृद्धिकृत् पौर्णमास्यां तु दीक्षा च चतुर्वर्गफलप्रदा ८७ द्वादश्यां च चतुर्दश्यां नवम्याम
ष्टमीदिने शिवरात्र्याममायां च कार्तिके सोमवासरे ८८ शुक्रार्कभौमवारेषु मघाद्रा रेवतीषु च
श्रोणाश्विनीभरण्यग्नि स्वातिमूलेंदु विष्णुषु ८९ फाल्गुनीशानताराख्य ज्येन्मक्षे गुरोस्तु वा वै १२

धृतिं च व्यतीपात मतिगंडं च गंडकं ९० शूलं व्याघातमित्येते वर्जयित्वाखिला शुभाः भद्रं वा क
रणं देवि किंस्तुघ्नमपि बालवं ९१ मुहूर्तेन राशौ गिरिजे यथायोगं समाचरेत् सर्वलक्षणसंपन्ने
दिने कुर्यात्तथापि वा ९२ दोषाल्पत्वं गुणाधिक्यं दीक्षादीक्षा मयोजयेत् अपूर्वदीक्षाकरणे विधि
रेषउदाहृतः ९३ यथवांतरदीक्षा वेत् सर्वकाले न संशयः यदिन श्येत्प्रमादेन लिंगमन्यद्यथा
विधि ९४ दीक्षापूर्वं प्रकर्तव्यं यदि सञ्जीकयासह स्फुरितेनु कवित्लिंगे दीक्षां सद्यः समाचरे
त् ९५ मध्येभेदे महादेवि नदागाधाजले क्षिपेत् एकरात्रिविधानेन विनाहोमाभिषेचनं ९६ सं
स्कृत्य धारयेल्लिंगं नदोषस्तत्र विद्यते अथवे सञ्जिकानाशे तदान्यां कारयेत्सुनः ९७ प्राण
स्थापनमारभ्य शिष्टसंस्कारमाचरेत् गुणनाशे पुनर्देवि गुणमन्ये स्कयोजयेत् ९८ सञ्जि

१२ कागुरुलिंगादौ यन्नष्टं न तथाचरेत् यल्लिंगमादितो लब्धं यावज्जीवं नदेवहि ११ नान्यल्लिंगं
भवेन्मध्ये यदिस्यात्सनुपातकी सज्जिकागुरुण वस्त्रादि यद्दत्तं गुरुणा ततः १०० यावज्जीवंनदे
वस्यादन्यथायाति रौरवं यल्लिंगं गुरुणादत्तं प्राणलिंगं नदेवहि १ मध्येनष्टे प्रमादेन देहंस
त्काशिवंव्रजेत् आति क्रम्य गुरुं यस्तु गुरुमन्यं समाश्रयेत् २ सजीवन्नेवचांडालो मृतो नर
कमश्नुते गुरुभक्त्या महेशानि सदा मल्लिंगधारणात् ३ ऐहिकं च सुखं तस्य सौभाग्यं च पदे पदे
सज्जिकादि क्रमेणाथ लिंगभेदं विशेषतः ४ उक्तं न वाखिलं देवि किंभूयः श्रोतुमिच्छसि ७
इतिश्री पारमेश्वरतंत्रे शिवाद्वैतसिद्धांते वीरशैवदीक्षाप्रकरणे लिंगसज्जिकादिस्वरूपनिरू
पणं नाम द्वितीयः पटलः २ १२

श्रीविश्वात्मनेनमः श्रीगुरूनाथायनमः श्रीसांब॰ देव्युवाच नमस्तेमेरूकोदंड धारिणेफणिहा
रिणे वदविश्वेश्वदीक्षाया विधानंपरमेश्वर १ ईश्वरउवाच शृणुवक्ष्यामिदेवेशि दीक्षाविधि
मनुत्तमं यस्यविज्ञानमात्रेण योग्यस्याल्लिंगधारणे २ उपलिप्यगृहंसम्यगुक्तलक्षणकेदिने
सुधादिशोभितंकुर्याद्रंगवल्याद्यलंकृतं ३ वितानतोरणाभ्युक्तं धूपदीपविराजितं सन्मं
गलसमायुक्तं यथाविभवविस्तरं ४ यथाप्रोक्तियथाभक्ति मनोन्मत्यर्थिसंयुतं कार्यहिवैभ
वंदेवि वित्तशाठ्यंनकारयेत् ५ यजमानःसमुत्थाय निर्वर्त्यप्रातराह्निकं मित्रबांधवसंयुक्तो
मंगलस्नानमाचरेत् ६ स्वशुभेस्वसमेदेशे गोमयेनोपलिप्यच रक्तमृत्तिकयातत्र विलि
प्यचतुरस्रकं ७ बाहुमात्रप्रमाणेन पंचवर्णैर्विलेखयेत् रंगकैश्चित्रकैःपद्मैःसर्वत्रसमलंकृते ८

१८
१५ मंडले नूतनं वस्त्रमास्थाप्य तदुपर्यथ पंचप्रस्थप्रमाणेन निक्षिपेच्छालितंडुलान् ९ तदुपर्य
मलं कुंभं निक्षिपेन्नूतनं दृढं अनुलिप्य सुधाभ्युक्तमापूरितजलं शिवं १० पंचपल्लवसंयुक्तं
कुंकुमाद्यैरलंकृतं अश्वत्थोदुंबरप्लक्षवटचूतमहीरुहान् ११ कलशोपरितः सूत्रं वेष्ट
यित्वा यथाविधि तदंतर्नवरत्नानि निक्षिपेद्भक्तिशक्तितः १२ सुवर्णं वा यथाशक्ति रत्नसर्वं
गुरवेर्पयेत् प्राणप्रतिष्ठां कुंभस्य कुर्यान्मूलेन पार्वति १३ गुम्फितेपट्टवसने निक्षिपेत्कल
शोपरि आबध्य कंठे हारिद्रमावेष्टितमलंशुकं १४ संवेष्ट्य मालिकाभिश्च दिव्यधूपैः सु
धूपयेत् चत्वारः ऋत्विजस्तत्र गुरुरेकस्तु पंचमः १५ समर्चयेयुः कलशं बिल्वपत्रैस्तिलाक्ष
तैः दूर्वाभिः कोमलाग्राभिर्द्रोणैश्च करवीरकैः १६ पंचाक्षरेण तारेण पराप्रासादमंत्रतः १५

प्राक्तिपंचाक्षरेऐव पंचब्रह्मानुवाककैः १७ अर्चयंतिपृथक्कुंते पंचैतल्लिंगमृत्विजः ध्यात्वाबाह्य

महादेवं कलशोपरिपूजयेत् १८ नामनाथ्यंतमीशान मुमयासहितंशिवं चतुर्भुजंचंद्रकलाव तंसं

वराभयंहरूकुठारपाणिं वामांकसंशोभितशैलकन्यं भजेन्महेशंपरमात्मरूपं १९ अथसंपूज्यविधि

वत् षोडशैरुपचारकैः यस्यस्मृत्यादिकर्माणि समाप्यकलशार्चनं २० उपस्थानंप्रकर्तव्यं ऋत्विग्भि

रपिपर्वभिः श्रीरुद्रस्यानुवाकेन मूलेनमनुनाशिवे २१ एवंदिनत्रयंकुर्यात्प्रत्यहंकलशार्चनं ष

ड्रसैरन्नपानाद्यैर्भोजयल्लिंगधारिणः २२ आवश्यकंकर्मदेवि नियतोनियतेंद्रियः एकाहारो

भवेन्नित्यं यजमानःपयोव्रती २३ अथतद्दक्षिणेभागे कुंभस्थापनदेशतः विज्ञानादिसमोपेते

सुस्नानेवेदिकोपरि २४ निक्षिप्यपीठममलं मूलमंत्रेणतद्गुरुः सद्योजातेनतद्रूपं यान्वात्यांश्रुक

१५ मुत्तमं २५ वामदेवेन तद्रूपे तल्लिंगं विनिक्षिपेत् अघोरेणाथ लिंगस्य सञ्जिकायागुणं स्य
च २६ तत्पुरुषस्यानुवाकेन ईशानस्यानुवाकतः क्रमेणाकुर्यात्तत्प्राण प्रतिष्ठां गुरुरादरात् २७
पूर्वोक्तमेवंध्यायीत लिंगरूपां तनुं मम आवाहनादि कुर्वीत गुरुरास्तिक्यसमन्वितः २८ मूले
नावाहनं कुर्यादासनं प्रभवे नमः पाद्यमीशाय देवाय दद्यादर्घ्यं शिवाय च २९ दद्यादाचमनं स्ना
नं महादेवाय ते नमः पंचामृतस्नानमथ कुर्यात्संचानुवाककैः ३० आपोहिष्ठेति शुद्धोद स्नानं लिं
गाय कारयेत् दद्यात्कपर्दिने वस्त्रमुत्तरीयं त्रिशूलिने यज्ञसूत्रं ततोदद्यात् पशूनांपतये नमः
गंधं कामांतकायेति चाक्षतान्मृत्युघातिने ३१ पुष्पं वृषध्वजायेति समर्प्यांगानि पूजयेत् शिवा
य पादौ गुरवे गुल्फौ जंघे मृडाय च ३२ जानुनी शंकरायेति नमस्तूरू भवाय च कटिं पिनाकहस्ता १५

य नाभिं तु मेरुधूर्जटिने ३३ उदरं विश्वरूपाय विरूपाक्षाय च स्तनौ हृदयं पार्वतीशाय वक्षः कैलासवा
सिने ३४ कंठं तु नीलकंठाय स्कंधौ स्कंदसुताय ते अनंतबाहवे बाहून् हस्तान् हस्तित्वचे नमः ३५
अंगुलीरंगजहने कक्षं पंचमुखाय ते कर्णौ दिग्वर्णिने देवि नासिकां सर्वगंधिने ३६ वक्त्रं तु सर्वव
क्त्राय नेत्राणि त्रिदशे नमः भ्रुवौ भूभारभंगाय ललाटं मल्लिकाक्षिणे ३७ शिरः सर्वोत्तमायेति
सर्वांगं शशिमौलिने पूजयित्वाखिलांगानि महापूजामथाचरेत् ३८ सहस्रनामभिर्देवि रुद्रसू
क्तोक्तनामभिः मूलमंत्रेण चान्यैर्वा स्तोत्रमंत्रैः समर्चयेत् ३९ पंचपुष्पाणि पूजायामवश्यं वि
धिनार्चयेत् द्रोणं च बिल्वपत्रं च नित्यं नित्यार्चने शिवे ४० तिलाक्षतैस्तंडुलैर्वा नित्यपूजां समाच
रेत् यान्यन्यानि सुगंधीनि वन्यानि ग्रामजानि वा ४१ सर्वस्यां मम पूजायां पुष्पं पल्लवपत्रकं

१६
माम्यं वा वनजं वापि सर्वेस्याल्केनकी विना ४२ पद्मैरपामार्गकैश्च कल्हारैश्च कदंबकैः पै
चैकैजातिकुसुमैर्मल्लिकावनसंभवैः ४३ उत्पलैः करवीरैश्च शामंती पाटलैः शुभैः चुतपुंनाग
बकुलमरुगैर्दवनादिभिः ४४ कुदुजैर्वा कुरुवकैः कुंदकेसरनागकैः इत्याद्युक्तैरनुक्तैर्वा
ममलिंगं सपुजयेत् ४५ दुर्वाभिस्तुलसीबिल्वैः करवीरैश्च कोमलैः द्रोणैश्च पंचभिर्नित्यं म
मलिंगं समर्चयेत् ४६ मोक्षार्थी बिल्वजैः पत्रै रर्चयन्वति लोक्षतैः धर्मार्थदो लकुसुमै रर्थार्थक
रवीरजैः ४७ अर्कपुष्पं राजवश्यं नृवश्यं कमलार्चनं मल्लिकाभिर्जयार्थं चेद्दूर्वाभिः कीर्तिकाम
नः ४८ आरोग्यकाम्युत्पलजैः पुत्रकामी कुरुंटकैः पुंनागैः पशुकामी च सर्वार्थिः सर्वसंभवैः ५१
एवं संपूज्य विश्वेशि प्रत्यहं तु दिनत्रयं तथाष्टांगयुतं धूपं गंधाक्ष्यत् कारिणा ५२ कर्पूरादिसुदा १६

पांश्च सोमसूर्याग्निचक्षुषे नैवेद्यं षड्रसोपेतं यथायोग्यं ममादरात् ५३ अंतांनांपनयेत्तुभ्य
मितिमंत्रेण निर्मलं ततस्समर्पयेद्देवि लिंगरूपमयिप्रिये ५४ तांबूलंचसकर्पूरं रसतायेति
मंत्रतः घृताक्तवर्तिसंयुक्तं नीराजनमथाचरेत् ५५ मंत्रपुष्पं ततोदद्यात् त्र्यंबकेतिस्कमंत्र
तः प्रदक्षिणनमस्कारान् कृत्वास्तोत्रैस्स्तुवेदथ ५६ क्षमार्पनंप्रार्थनंच यस्यस्मृत्याक्षमापये
२ त् रात्रोजागरणं कुर्यान्ममलिंगस्यसंनिधौ ५७ लिंगेनसहकुर्वीत सज्जिकायागुणस्यच
प्राणस्थापनमारभ्य यथालिंगस्यतत्तथा ५८ यदितंतुपटोत्पंनो नचैवंसज्जिकागुणे यदि
लोलेमयीसज्जा यदिवाताद्दृष्णोगुणः ५९ लिंगेनसहसंस्कारं कुर्यादेवमतंद्रितः शैथिल्येस
ज्जेकादेस्तु संस्कृत्यपुनरन्यतः ६० अष्टबंधेविशीर्णेतु पुनर्बंधंचकारयेत् यदिमोहात्त्यजेद्द

१८ हं सर्वांशाल्लोभं विपश्यति ६१ यन्नष्टं तन्नकुर्वीत यथाशास्त्रं गुरोर्वचः नतिष्ठेन्नियमेनासौ लिंग
संपूजनाहते ६२ नान्यधर्मो भवेद्धर्मो नधर्मोधर्मएवच नान्यधर्मैर्नपाषांडै र्नदुर्वृत्तैर्नलोलुपैः ६३
नधूर्तैर्नगुरोर्भक्तै र्नाभक्तैर्नानृतोक्तिभिः नमतद्वेषिभिर्मूर्खै र्नानाचाररतैरपि ६४ नशठैर्ना
र्थलुब्धैश्च नागुरूक्तार्थकारिभिः नस्त्रीषुलोलुपैर्जारै र्नचौरैरात्मकारिभिः ६५ नदूषकैर्ह
सकैर्वा नानार्हैश्च कचिल्लिये सहोपवेशयेद्भावे दर्शीयात्संगमाचरेत् ६६ स्वपद्रच्छेदुपश्लोक्य
न्नालोकेन्नाभिवादयेत् यदिघात्कस्तदाल्लिंगं शिवयोगीसमर्चयेत् ६७ पुण्यकालेषुयोगेषु
विशेषेणसमर्चयेत् संक्रान्तौ विषुवेचैव स्वजन्मत्रितये दिने ६८ नवम्यां चचतुर्दश्यां सिता
यां सोमवासरे यथाशक्त्यर्चयेल्लिंगं पौर्णमास्यां विशेषतः ६९ अर्धोदयस्यलक्षणमाह १८

॥ज्योतिषे॥ अमार्कश्रवणोपाते युक्ताचेत्पुष्यमाघयोः आर्धोदयस्य विज्ञेयः किंचिन्न्यूनो महोदयः १
कृष्णपक्षत्रयोदश्यां मघामिंदुकरे रविः यदा तदा गजच्छाया श्राद्धे सर्वे रमापते २ नभस्य सि
तपक्षे च षष्ठी कुजदिने यदा रोहिणी पातयोगेन सा षष्ठी कपिलस्मृता ३ आनुक्ता: अर्धो
दयादियोगेषु ग्रहणे चंद्रसूर्ययोः व्यतीपाते कुलयोगे प्रदोषे च विशेषतः प्रतित्रयोदशी रात्रौ
शनियोगे विशेषतः ७० कृष्णाभौमचतुर्दश्यां गुरूणां च मृतेऽहनि पित्रोः सिद्धिंगतदिने विशेष
णा समर्चयेत् ७१ शुक्लभौमचतुर्थ्यां तु कृष्णाष्टम्यां विशेषतः नृत्यवादित्रगीताद्यैर्यथाविभ
व विस्तरं ७२ दरिद्रः करनालैर्वा घंटानादेन चार्चयेत् कोटयो ब्रह्महत्यानाम गम्यागमकोट
यः ७३ श्रवणेनैव घंटायाः नादस्यायांति संक्षयं श्रूयते हि जनैर्यावत् घंटानादः समंततः ७४

१८ तावद्यापानि रक्षांसि भ्रान्त्यास्थातुं न हि क्षणं तस्मात्सयत्नतो देवी घंटानादं समा॰ धयेत् ७५ नैवैव
यत्नतो देवि ताडयेज्जयघंटिकां तदभावेपि यत्नेन कांस्यनादं समाचरेत् ७६ कुर्वीत कहलानादं म
मलिंगार्चनोत्सवे लिंगधारिविशेषेण शंखनादं न पूजयेत् ७७ सर्वाभावेपि यत्नेन यतः शंखाम्
मप्रियः दीपान्प्रज्वालये देवि ममलिंगस्य संनिधौ ७८ अभिषेकः प्रकर्तव्यो यथाशक्त्या मलोदकैः
चुलकोदकमारभ्य यावल्लक्षाभिषेचने ७९ तावदासेचयेल्लिंगं मधिव्याधिकं फलं॥ गंधं तेनैव
मं शुगंधलक्षणं लिख्यते॥ कस्तूरीकुंकुंगंधं कर्पूरं चंदनं शोभनं उशीरं चागरुः कोष्टं तमालं दलमेकव १
७ शिवाष्टगंधमेतत्तु ह्यष्टमूर्तिस्वरूपकं साधयेद्यत्नतो गंधं कस्तूर्यादि स्वशक्तितः ८० य
शक्तिः सर्वयत्नेन द्रोणपुष्पैः समर्चयेत् सर्वदा सर्वयत्नेन सर्वत्यक्ता लुपार्वति ८१ सर्वालाभा १८

न

परं मत्वा लिंगार्चनपरो भवेत् यथाशक्ति यथाभक्ति यथाकालं यथास्फुरं ८२ यथासंभाविते द्रव्ये
लिंगपूजापरो भवेत् चतुर्थे तु दिने देवी स्त्रोबस्य वगाहनं ८३ यथेष्ठ यजमानस्य मंगलस्नानमा
चरेत् समेत्य बहुभिर्वृद्धैः शिवतत्त्वार्थवेदिभिः ८४ लिंगपूजास्फनिरतै र्लिंगिभिः शिवयोगि
भिः पीठपुराणे लैंगमे नंदीशं पूजयेच्छिवे ८५ नंधूर्भिका सदाधार्या भक्तस्यांगुष्ठपर्वणि नोच्छि
ष्टदोषस्त्वान्योन्यं भुंजानां धृत लिंगिनां ८६ नवप्रक्षालनं पाण्योस्तदुच्छिष्टधियाशिवे प्रायन:
श्रीगुरोः पाद पद्माये शयिता भवेत् ८७ यथा शिवे तथा लिंगे यथा लिंगे तथा गुरौ यथा गुरौ तथा प्रा
णे तथा प्राणानुशासने ८८ यथा यथैव तच्छास्त्रे मते चापि तथा भवेत् एकाभिमानस्सा द्रक्षि
वीरशैवमते मम ८९ लिंगधारणमात्रेण कृतो सौ मानुषः शिवे सदा विभूतिसंपर्का सदा

१९ रुद्राक्षधारणात् ८९ धारणान्ममलिंगस्य सोहमेव न संशयः अणुमात्रमपी शानि ललाटे यस्य दृ
श्यते ९० मन्नामपाविनाभूति: सोहं रुद्रो न संशयः धृतं सद्भूतिसर्वांगं येपश्यंसपिपापिनः ९१
नएव यथन्या गिरिजे तेधान्यान्या वयंतिच यस्यदेहेस्ति रुद्राक्षो यावद्भक्त्यै कएव वा ९२ नंदृष्ट्वा दूर
तो यांति पापानि विविधानिच विभूतिरपि रुद्राक्षं लिंगं यस्य त्रयं तनो ९३ स साक्षाद्रुद्र ईशानि
सोहमेव न संशयः ममलिंगार्चनाभूति रुद्राक्ष मनुजापने ९४ एकैक एवमस्याप्ते किंफलं सर्वसं
निधौ ललाटे भस्मना पुंड्रं करे रुद्राक्षजापने ९५ कंठे च लिंगाभरणं सोहमेव न संशयः ६
नि श्री पारमेश्वर तंत्रे पूर्वार्द्धेन सिद्धांते वीरशैवदीक्षायां लिंगार्चनाविधीस्तृतीयः परलः ३ श्री १९

वीरशैवाख्यदीक्षांगकारिकोक्ते

श्रीगुरुभ्योनमः ईश्वर उ० उपविश्ययुरुः पीठे प्राणायामादिकं चरेत् । यथाकामं समाचरेत् २
ममित्यथ १ कृत्वा संकल्पमीशानि होमदेशं विशोधयेत् । स्थंडिलं वापि कुंडं वा यथाकामं समाचरेत् २
स्थंडिले सर्वसंपत्तिः कुंडे सर्वार्थसिद्धयः । स्थंडिलं त्रिविधं प्रोक्तं कुंडं पंचविधं शिवे ३ चतुरस्रत्र्यस्र
वृत्तभेदा धर्मार्थकामदाः । चतुरस्रत्र्यस्रवृत्तार्धचंद्राः कर्मठाक्रमाः ४ धर्मार्थकामसायुज्यकैव
ल्यफलदायिनः एते ब्वन्यतमे देवि प्रदेशे होमकर्मणः ५ पुण्याहवचनं कृत्वा नांदीकर्मस
माचरेत् । पंचगव्यादिकं पीठासभां च शिवयोगिनो ६ संपूज्य शक्तितो भक्त्या गुरुरग्निमया
नयेत् । योगिनीभिः सहेशानि चतुर्भिर्लिंगधारिभिः ७ सूर्यारणि शिवागार शिवयोगिग्र
हादिभिः मूलमंत्रेणचोद्दिप्या शिवादेसं च मुद्रया ८ पंथांतरे पंचमुद्राः प्रदर्श्यंते स्तंभनं च

२०

सुरभिंच धेनुंमत्स्यंतथैवच योनिमुद्रानमस्कारे पंचमुद्राः प्रकीर्तिताः ८ पूर्वभागेग्निकुंडस्य संस्था
प्याग्निमथोपरि संस्कुर्यात्स्थापनंदेशं वीक्षणादिभिरष्टभिः ९ वीक्षणंताडनंदेवि प्रोक्षणंचाभि
मर्शनं खातनंप्रार्थनंचाभि मंत्रणंचनमस्कृतिः १० वीक्षयेत्स्मरणादेनादौ यागदेशंगुरुः शिवे न
थास्त्रमंत्रितोयेन प्रोक्षणंताडनंविदुः ११ तदेवप्रोक्षणंनारुजकनैक्षणादिभेदतः स्पृष्ट्वा हस्ते
नतत्कुंडं जपोयत्वभिमर्शनं १२ खातनंतुखनित्रेण खातनंहवनस्थले प्रार्थयन्मूलमंत्रेण
यथाशक्त्याभिमंत्रणं १३ नेत्रैवद्वादशजपैः स्पृष्ट्वा तदभिमंत्रणं नमस्कृतिर्नमस्कारै रेतै
रष्टभिरन्वितैः १४ मेखलात्रयसंयुक्ते साश्वत्थदलशोभिते साधारभ्यंतरोगाये तां दृक्
प्यायामशोभिते १५ मूलेनाग्निं प्रतिष्ठाप्य पुनस्तेनानुमंत्रयेत् हुमिति प्रोक्षितं चाग्नौ २०

निक्षिपेत्समिधांशानं १६ यमन्या ध्यायैमेदग्निं कवचेनगुरुःप्रोवे ज्वलितेग्नौपुनर्ध्यायेत्
मामेवपरमेश्वरि १७ चतुर्भुजमुदारांगं चंद्रशेखरमव्ययं कुठारेणाभयवरपाणिपंकजशोभि
तं १८ वामांगालिंगितांद्रींद्र तनयंपरमेश्वरं मंदस्मितंत्रिनयनं मुमारमणमीश्वरि १९ अ
थध्यायीतभवतिमेवंरूपंविचक्षणः उद्यदादित्यसंकाशामरुणांशुकां २० अंतर्गतमहद्वह्निं णाभर
गुर्विणींकुंडरूपिणीं सहजारेणमूलेनदध्यादाज्याहुतिर्दश २१ शिरोसिजेंगनाभीषो त्यनेनाग्निं
विभावयेत् तद्गर्भजठरेदेवि समुत्पन्नंहुताशनं २२ नमोग्नयेतेरुद्राय पशूनांपतयेनमः
नमउग्रायवीराय नमस्तेचंद्रमौलये २३ इत्यग्नौपृथगाज्येन हुतेदेवंशनाहुतीः अथपत्रेन
कुंडस्थे ध्यायेद्रुद्रंहुताशनं २४ सप्तहस्तंचतुःशृंगं सप्तजिह्वंद्विशीर्षकं त्रिपादंनिर्मलमुखं

२१ सुखासीनं शुचार्पितं २५ नोमरं व्यजनं वालं चापवारो वराभये दधानं सर्वभूषाढ्यं सद्योजातं महेश्व
रं २६ नमो रुद्राय देवाय चेशानाय कपर्दिने हुताशनाय नीलाय लोहिताय ककुद्मिने २७ स
हस्रारेण मूलेन प्रतिमंत्रं नरं तदा जुहोद्दाज्येन देवेशि षोडशाज्याहुतीः क्रमात् २८ [illegible]
जातस्य जातकर्मार्थं हुनेदाज्याहुतिर्दश सहस्रारेण मूलेन जातकर्म समुच्यते २९ रुद्राग्निरि
ति वेशानि नामकर्मैव भावयेत् सहस्रारेण मूलेन हुनेदाज्याहुतिर्दश ३० पृथग्भूतमुमेशाभ्या
मग्निं सवित्रयोगिने कुर्यान्निष्क्रमणं नाम हुनेदाज्याहुतिर्दश ३१ कर्णवेधाभिधं नाम सं
स्कारं मणिकुंडलं भावयित्वा शुचिः कर्णौ हुनेदाज्याहुतिर्दश ३२ अथान्नप्राशनार्थं च चौलार्थं
क्रमतो दश सूत्रोपनयनं नाम संस्कारं मूलमंत्रतः ३३ नारेण प्राणमूलेन नमो रुद्राय च क्रमात् २१

हुनेदाज्याहुतीरग्नौ प्रीत्यर्थं विंशतिं हुनेत् २४ शतमष्टोत्तरं पश्चान्मूलेनाज्येन पार्वति कुर्याद्विवाह
संस्कारं स्वाहया सह वैश्रवे: २५ तरुणं रूपसंपन्नं सर्वांगं दीप्ततेजसं स्वाहाशोभितवामांकमभिध्या
येत्कृतांशाने २६ तस्य जिह्वा महादेवि सप्तसप्तार्चिषः शुभाः ध्यात्वा क्रमेण जुहुने सप्तसप्त
हुती: शिवे २७ लेलिहाना कराली च रोचिष्केशा त्रिलोहिता विद्युत्प्रभा शिवा स्व्याव तत्रमध्याशि
वाभिधा २८ तस्यां विशेषतो देवि हुनेदाज्याहुतिर्दश सहस्रारेण मूलेन ध्यायेद्दुद्रमयं स्तुवि २९
अर्थार्थी लेलिहानायां करालयां धर्मकामतः पुत्रकीर्त्यर्थवान् रोचिष्केशायां पुष्टिकामतः ४०
आयुष्कामी हुनेच्छांति लोहितां पापशुप्रियः विद्युत्सरि विना शार्थ प्रभायां शिवलोकधी: ४१
मोक्षार्थी रक्तहुया हे देवि शिवायां च तनोमम दशाद्वादशपंचाष्ट त्रिंशषोडशषष्टित: ४२

अष्टोत्तरशतंचैव तु नेदाज्याहुतिं ष्टावे अथकुंडस्यपरितो मेखला त्रितयेयजेत् ४३ जयाचविज
क याभद्रा तीव्रगौरीकुंडनी ईश्वरीप्राणवीदिव्या ज्वालिनी भोगदायिनी ४४ कल्याणीगगनार
क नंदाज्योतिष्मतिः क्रमात् प्रणवादिनमो मंत्रैर्दिक्षुपूर्वादिषु क्रमात् ४५ पाशांकुशावराभीति
हस्तअर्धेंदुशेखरः तृतीयस्यां मेखलायां पूज्या षोडशशक्तयः ४६ हृल्लेखा गगना रक्ता महोत्सु
ष्मा कपिंजला अरुणमालिनीप्राणा निद्रा चक्रोधनी क्रिया ४७ अलंबुषासिनीवाली कुहूरा
का यथाक्रमात् मध्यमेमेखलावृत्ते पूज्याषोडशशक्तयः ४८ अमृतामानदापूषा पुष्टिस्तुष्टि
रतिधृतिः शशिनीचंद्रिका कांता ज्योत्स्ना प्रीतिः प्रियंवदा ४९ गांधारी हस्तिजिह्वा च विपनी २२
चक्रमादिनी प्रथममेखलावृत्ते पूज्याः षोडशशक्तयः ५० इंद्राद्याअष्टदिक्पाला वाहना

रिपुसंयुताः दुर्गागणपतिक्षेत्रपालमृत्युंजयास्तनः ५१ अभये करई शानि मध्येदिक्षुविदिक्ष्वपि
स्ववाहनायुधोपेता पूज्याः कुंडेतजोहुनेनतु ५२ क्रमेणाऽपाहुतिं तेष मेकमेकमतं द्विजः जयादि
शक्तिमारभ्या भयंकरमथांतनः ५३ सहस्त्रारेणमूलेन त्रिपंचा घाहुलेभ्वारि अथसंप्रार्थ
येदग्निं ज्वलंतंममरूपिणं ५४ नमस्तेसप्तजिह्वाय नमस्तेरुद्रमूर्तये नमः सर्वहविर्भोक्त्रे न
मोदिक्ष्वग्नये नमः ५५ चतुःशृंगाय शांताय वीतिहोत्रायतेनमः वैश्वानराय देवाय वन्हयेविश्वक
र्मणे ५६ धनंजयायरुद्राय ज्वलनाय नमोस्तुते नमस्तेनूनपादेते नमस्तेजातवेदसे ५७ उष
र्बुधाय बोध्याय अहिर्बुध्न्यायतेनमः नमस्तेबर्हिषेनित्यं नमःशुष्माय शंभवे ५८ रूपीदयोनये
तुभ्यं नमस्ते कृष्णवर्त्मने आश्रयाशायचबृहद्भानवेतेनमोनमः ५९ इतिसंप्रार्थ्यकुंडस्थ

२२ मावयोस्तनयं शिवे आचयोरेकरूपेण ध्यायेदग्निं मनोद्भितः ६० प्रौढैरष्टभिस्तोयैः परितोग्ने
र्मुवीक्षयेत् नमः पञ्चाङ्गुरुः कुर्या द्दर्भैः परिसमोहनं ६१ प्रणवेनाहृतैर्दर्भैः परितोग्निं परिस्त
रेत् प्रणवेनाग्न्युपस्थेच पालाशानू परिधीनू क्षिपेत् ६२ औदुंबराः शमीजाता यद्विकामप्रदाः
शिवे पालाशाश्वत्थकाश्मर्यमयाः परिधयोन्यतः ६३ अथाग्नौ मर्चयेत्पश्चा द्विष्करकास्तै
सुभैः प्रागादीशानपर्यंतं क्रमेणैभिः प्रदक्षिणैः ६४ नमः शिवायरुद्राय मृडाय शशिमौळये
ईशानाय गिरीशाय रुद्रायायोगमूर्तये ६५ अलंकृत्याष्टभिर्दिक्षु पुष्पै रप्यमलैः शिवे अ
ग्नेरुत्तरदिग्भागे बहुदर्भान् क्षिपेत् ध्रुवं ६६ तेनैव प्रणवाख्येन चैतत्तदुपरि क्षिपेत् दर्व्याज्य २२
स्थालिकां चैव प्रोक्षणी पूर्णपात्रिका ६७ इध्मस्रुवाविनीतानि षट्पात्राणि प्रयोजयेत्

पुनश्चावोक्षयेच्छ्रिये प्र

सहस्त्रिरन्वदर्भाग्र पाणिनावोरसांभसा ६८ कृत्वोत्तानानि पात्राणि पुनश्चावोक्षयेच्छ्रिये प्र

णवेनहृदांमूर्ध्नि प्रोक्षणीमग्रतोनयेत् ६९ सहस्त्रारेण मूलेन साक्षतंजलमानयेत् शिवाय

शंभवे तुभ्यं नमो रुद्राय मृत्यवे ७० प्रोक्षयेच्चाग सामग्र्यं सपवित्रेण पाणिना तदन्यत्रसमु

त्सृज्य पूर्णपात्रमथाहरेत् ७१ तच्चापि पूर्ववत्कृत्वा चोद्धृत्यमुखतः समं क्षिपेदुत्तरतोग्नेश्च

हुंफट्स्वाहेतिमंत्रतः ७२ तदुपर्यष्टभिर्दर्भै राचार्यः प्रणवेनच मूलमंत्रेणचाभ्यर्च्य नम

स्कृत्याभिमंत्रयेत् ७३ ततः आदायचार्घ्यार्च्य आज्यस्थाल्यांपवित्रकं अपनीयक्षिपे

द्दर्भिःचाज्यसंस्कारमाचरेत् ७४ अंतर्गतपवित्राये आज्यधानीं पृथक्कुर्वन् नमओं निक्षिपे

द्दर्भाग्रो स्वाहादेवी विलापयेत् ७५ हुंफट्दर्भाग्रयुगल माज्यधान्यां क्षिपेच्छिवे प्रदर्श्य

२५

ज्वालितान् सर्वान् पुनस्तैरेव साग्निभिः ७६ सहतारेण मूलेन क्षिपेद्वह्नौ शिवेर्पयेत् अथ
स्रुवा समारभ्य वायुमाग्नेयकोणगां ७७ अपूरयेदविच्छिन्नां आज्यधारां गुरुः शिवे तदा
नीमग्निमारभ्य ध्यानांतं तारवर्मणा ७८ प्रास्त्रमूर्ध्ना स्रुचा देवि जुहुयाद्वक्षसिस्थया ता
रापूर्वेण मूलेन शिवायेति समर्पयेत् ७९ अथ सज्जाज्यमाचार्य ऋत्विजश्च समंततः द
क्षिणादिक् प्रतीचीषु प विश्याग्नौ जुहुयुर्घृतं ८० पंचानुवाकमंत्रैस्तु शानमष्टोत्तरं क्रमा
त् सहतारेण मूलेन सहस्रं च सत्विजः ८१ प्रत्येकं गुरुणा होमः कार्योग्नौ गिरिनंदने
अथ हुत्वा हृदि दिक्पालान् तारांहुं फट् शिरोन्विते ८२ दुर्गां गणपतिं गौरीं जमदग्निं च नंदिनं
वृषभं भृंगि रिटिकान् कुमारमपि पार्श्वगान् ८३ एकैकस्य क्रमादष्टौ हुनेदाज्याहुतीः प्रिये

ईश्वरीं अचलां सञ्ज्ञां दुर्वासं
सं शिवं रुद्रं त्रियंबकं उमापतिं ८२
कश्यपं कपिलं कण्वं

हुनेत्वयस्हान्ततं मंत्रैः पूर्णाहुतिंहुनेत् ८५ हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्ताहुतीर्हुनेत्
अग्निमूर्धाग्नयेवेति रुद्रद्रायानुवाककैः ८६ पंचब्रह्ममयैस्तारैर्मूलेनक्रमशोहुनेत् सहस्रा
रेणमूलेन होमश्चैवंसमापयेत् ८७ ततः शास्त्रानुसारेण गुरुरेवमतंद्रितः ८८ इति श्रीपा
रमेश्वरतंत्रे शिवाद्वैतसिद्धांते वीरशैवदीक्षाप्रकरणे दीक्षाहोमप्रकरणंनाम चतुर्थोध्यायः ४

25.

२६ श्रीगुरुभ्योनमः अथश्रृणुमहादेवि दीक्षाबंधनलक्षणं सज्जिकागुणलिंगानां संयोगक्रममादितः
१ पुनः संपूज्य तल्लिंगं यथाशक्त्युपचारकैः सज्जिकांचगुणं वस्त्रमुद्रास्यप्रणवेन नतः २ स्मृत्वा
मां मूलमंत्रेण गुरुरावाह्यसज्जिकां अभिमंत्र्यानुवाकैस्तैः स्वीकुर्याच्चगुणं ततः ३ द्विषट्कारं तु
मूलेनाभिमंत्र्याथ नियोजयेत् सहनारेण मूलेन योजयेत्सज्जिकां गुणं ४ तेनैवांतस्तरेद्वस्त्रे लिं
गं तेनैव पूजयेत् तेनैवोपरिसौवर्णं पूजयेत्सुप्रमुत्तमं ५ स्कवर्णरहितं लिंगं धारयेन्न कदाचन
सत्सुवर्णमभिशार्थे कार्यं लिंगसंनेशयः ६ कपाटं बंधयेद्देवि मूलेनार्गलयोजनं मूलेन वस्त्र
माबध्य संप्रदायगुरूक्तितः ७ विशिष्टं पूजयेद्देवि ध्यायन्तां सज्जिकां ततः ममरूपं परं ध्यात्वा २८
स्तुवीतानेन पार्वति ८ नमः शिवाय रुद्राय शंकराय कपर्दिने मृडाय नीलकंठाय नमो धूर्ज

ष्टये नमः ९ ॐ नमः परमेशाय नमओंकाररूपिणे घंटाप्रियाय शार्वाय सर्वाय शशिमौलये १० न
मः फणीन्द्रभूषाय तरक्षुगजचर्मिणे नमो ललाटनेत्राय नमस्ते वृषमूर्तये ११ नमस्ते पंचवक्त्राय न
मोमृत्युंजयायते नमोंधकद्विषे तुभ्यं नमस्ते मेरुधन्विने १२ नमस्ते पार्वतीशाय गणनायकसून
वे नमः कुमारपुत्राय नमो गंगाधरायते १३ नमस्त्रिपुरसंहर्त्रे नमो विष्णुधवायते नमः शशां
कवर्णाय नमंस्ते शांभवे नमः १४ नमउग्रायवीराय नमः पशुपते हर पाहिमां गिरिजानाथ क्षमस्व
ममविप्रियं १५ तिष्टदेहेममसदा ममदेहे तवात्मनो देहिसायुज्यमीशान सौभाग्यं शिवशंकर १६
इतिस्तुत्वाथ तल्लिंगं सहसज्जितुणं शुभं निक्षिप्यपूर्ववत्पीठे स्तुत्वानत्वाभिषेचयेत् १७ ऋत्विक्
चतुष्टययुतो गुरुस्तत्कलशांभसा पीठस्थपजमानेतं अभिषिंचेदिसैः क्रमात् १८ पंचानुवाकैस्ता

२८ रेण मूलमंत्रेण रुद्रतः शुभ्रवस्त्रधरं भक्तं सर्वालंकारसंयुतं १९ सहनारेण मुलेन स्वामिमंत्र्या इथा
गुरुः विभूतिधारणं भक्त शरीरे स्वयमाचरेत् २० आदौ शिरसि मूलेन प्रणवेन ललाटके नमः कं
ठक्षियुगले स्वाहा कर्णद्वयांसयोः २१ वषट् वौषट् भुजद्वंद्वे हुं फट् तन्मध्यमागयोः प्रणवेन हृदीशा
नि हृदाकंठे पराभिधे २२ नारेण वक्ष्यसि शिवे मूलेनोदरनाभिके ऊरुजान्वंघ्रिजंघासु प्रणवेने
शा वलेपयेत् २३ यथोक्त्या परुद्राक्षान् धारयेत्स्वयं गुरुः सांप्रदायानुसारेण दीक्षा रुद्राक्ष भस्म
नो २४ अथ भक्तो गुरुं देवि पूजयेद्भक्तिपाक्तिनः मणिकांचनवस्त्राद्यैः स्वर्पयेत्सर्वमीश्वरि २५
गुरोर्दक्षिणपादस्य निबध्यांगुष्ठमूलके सूत्राग्रमन्यतस्याग्रे गृहीत्वा हस्तयुग्मतः २६ अथो २८
पदेशं कुर्वीत गुरुः शिष्याय मेमनुं संप्रदायानुरूपेण यथोक्तेन विधानतः २७ इत्येवं निर्वर्त्य दे

वेत्ति दीक्षापूर्वांगसंयुतं संबध्नीत गुरुर्लिंगं शिष्याय मम पोलजे २८ मोक्षार्थिनः शिखादेशे बा
हुमध्ये तु धर्मिणः कामार्थिनः कटीदेशे कंठे सर्वार्थिनः प्रिये २९ अष्टोत्तरशतं जप्त्वा मममूलं
महामंत्रं आबध्नीत गुरुर्लिंगं देहे शिष्यप्रयत्नतः ३० गायत्रीभिः पुरंध्रीभिः सर्ववाद्यविघू
र्णितं सन्मंगलसमायुक्तं यथाविभवविस्तरं ३१ अथ शिष्यो गुरुं भक्त्या प्रणवेद्भक्तितः पुरः
आशीर्वदेद्गुरुः शिष्ये मस्तके हस्तसंयुतः ३२ सुपुत्रो धनसंपत्तिर्बली शौर्यादिकोभव अथार्च
येत्सभां देवि स्वशक्त्या शिवयोगिनं ३३ दक्षिणां शुक्रतांबूल प्रणामाद्यैश्च भक्तितः निर्मले
रन्नपानाद्यैर्भोजयेल्लिंगधारिणः ३४ यथाशक्ति यथाभक्त्या सिद्धः शिवमयो जनः तदाप्र
भृति भक्तोसौ लिंगपूजापरायणः ३५ समबुद्धिर्भवेदात्म गुरुलिंगशिवेषु च त्रिकालमर्चये

२८ ल्लिंगं न्यायार्जितध नादिभिः ३६ द्विकालमेककालं वा सर्वदा लिंगमर्चयेत् नैस्वस्थेन त्यजेत्पूजां ना
नोपध्यनिमित्ततः ३७ यदि त्यजति मूढात्मा रौरवं नरकं व्रजेत् स्नानं तु भस्मना नित्यं सर्वाचारस्य पू
र्तये ३८ नस्पृष्टयबुध्यास्नात्वा यीत यदि कुर्यात्स पातकी लिंगं मम धृतं येन निखिलं खिलकर्मणा ३९
ये संतिजातिभेदास्ते नेकवर्ष्मि वयोगिनः पप्पदखिल जातिस्था नेकमातृसहोदरात् ४० न स्त्री
भेदो न पुंभेदो जातिवर्णाश्रमादिके सर्वात्मी नमिदं विधि वीरशैवमतं मम ४१ यदानायासतो
देवि भोगमोक्षकरस्थितो धारणान्मम ल्लिंगस्य पूजनाच्च निरंतरं ४२ नान्यत्कर्म नवै कार्यं व्रतमे
तन्महद्धि वे एकस्य द्रोणपुष्पस्य फलमप्यर्पितस्य तत् ४३ वक्ष्यामि शृणु देवेशि तद्द्वारे किं करो
म्यहं यद्द्रोणकुसुमैः पूजा मम सन्निधिकारणं ४४ ऋणात तस्य न मोक्ष्यामि फलं कोटि प्रानैरपि २८

पदेकमपि देवेशि बिल्वपत्रं समर्चयेत् ४५ मम लिंगे विशेषेण सदा निःशाम्यसंप्राय: निलाक्षतैः श
मीपत्रै रपामार्गैः पयोरुहैः ४६ दूर्वाभिश्चार्चयेन्नित्य मन्यैरपि सुगंधिभिः नद्वेष्टि तिं तयेल्लिंगधारि
णे शिवयोगिने ४७ नबालयुववृद्धादि तारतम्यधियाभजेत् प्रत्यक्ष तिष्टतदान्योन्यं दृष्टमात्रेण
लिंगिनः ४८ अभिवंदेत्तदान्योन्ये नभेदो लिंगधारिणां नब्रह्मचर्यनियमो नवानप्रस्थलक्षणं
४९ नसंन्यासोन वैराग्यं यदि लिंगार्चनेरतिः नमुंडने नापि शिखा नमुक्ताना रुणः पटः ५० नान
कष्टाटयेकष्टादिः स्वेछाभोगाहि लिंगिनः सामान्ये नार्चयेल्लिंगे नित्यं नित्यक्रमेणतः ५१ नैमित्त
केन कुर्वीत काम्यं कामानुसारतः सार्वत्रिके नित्यपूजां षोडशैरुपचारकैः ५२ यावल्लक्षं यथाशक्ति
नायासस्तत्र विश्यते यावे नैमित्तिकापूजा स्वजन्मर्क्षादि पूर्ववत् ५३ अभिषेकादिकं याव

२९ एकस्या कुर्याद्विशेषतः पृथक्दधिमधुपृथक् क्षीरघृतादिभिः ५४ अभिषिंचेत्प्रयत्नेन मम लिंगं
महेश्वरि अभिषिंचेद्यथाशक्ति नारिकेलफलोदकैः ५५ अन्नेन नवनीतेन मृदुशर्करयापि च पं
चामृतैर्यथाशक्ति विशेषेणाभिषेचयेत् ५६ शीतलैः सुगंधतोयैश्च स्कसेपुष्पैः स्कगंधिभिः धूपदी
पस्कपुष्पाणि मृदुनैवेद्यमर्चयेत् ५७ अन्नाद्यैरर्चयेद्भक्त्या स्वशक्त्या लिंगधारिणः लिंगवस्त्रा
द्यस णादीनि द्रव्याण्यमीक्षिते ५८ स्वर्णताम्बूलपुष्पाद्यैर्यथाभक्त्या समर्चयेत् स्थाप्य पृष्ठे ततः सर्वं
यदिस्यात्सन्निधौ गुरोः ५९ संपादितेस्वशक्त्या य तदुक्तं यत्नदाचरेत् गुरोस्तु जन्मनक्षत्रे सिद्धिं
गतदिनेपि च ६० यथाशक्ति यथाभक्ति पूजयेल्लिंगधारिणः न समीक्ष्यश्च कचिद्वापि लिंगिनं
शिवयोगिनं ६१ नाचारो वा न नाचारो लिंगी स्यात्स विशिष्यते धृतलिंगमहाभस्मरुद्राक्षाः २९
शिवयोगिनः ६२ शिवास्ते शिवभक्त्या सागता इति चिंतयेत् यद्यस्ति दुरेवादेवि शिवयोगी शिवार्चकः
६३

संप्राप्यां कारयेद्धर्मां न्यदलं संपुमेश्वरण अलाभेस्पृहिणो वापि धृर्तं लिंगिन एवहि ६४ शक्तिमात्र
विशेषेण स्वप्नाको लिंगमर्चयेत् नकर्षं धारणीं वीरशैवदीक्षासुदीक्षितः ६५ नखाते नखने
क्वापि नछेदनैव बंधयेत् नवहेछिरसाभारं नकाश्नेनेतरं लघु ६६ यदिच्छाकुसुमं धार्यं जटो
च्छाषादिभूषणं दीक्षितो वीरशैवायां दीक्षायां धृतलिंगिनः ६७ ननीचमाचरेत्कर्म नायासेनापि
कुत्सितं अथकाम्यानि कर्माणि वक्ष्ये तेलिंगधारिणः ६८ यदिस्याद्योगिनीयुक्तस्तदेत्थंव्र
तमाचरेत् सोमवारेविशेषेण द्रोणपुष्पाणि चाहरेत् ६९ अभिमंत्र्याथमनुना तानिपंचाक्षरेण
वै एकवारं समुच्चार्य मंत्रं मम समं पुनः ७० एकं समर्पयेदेवं सहस्रं प्रतिवासरं नियमेनैकवर्षां
तं समुपोष्याकृक्षदर्शनात् ७१ निधिलाभः पुत्रलाभः शिवएव नसंशयः तुलसीशत्रुनाशाय

२० वि

धत्तूरैः रोगनाशनं ७३ शमीशत्रुनाशाय कीर्तिदा हि तिलाक्षताः शिवरात्र्यां महादेविस्नाय।
दत्तमये हृदे ७४ संस्थाप्य पुरतः पीठे पूजयेल्लिंगमात्मनः कन्यार्थी पूजयेदर्कैं वंश्यार्थी तु
शमीदलैः ७५ मोक्षार्थी बिल्वजैः सर्वार्थ्ये जोन स्कंद री पुत्रकामी पाटलजैरर्कैरुच्चाटयेद्रि
पून् ७७ करवीरैर्भवेद्ध्यानं विद्यापुन्नागसंभवैः कुरंटकैर्धनप्राप्ति। धत्तूरैर्मारयेद्रीन् ७८ चूर्णै २
चिंषनाशाय मधूकैः पशुवृद्धये चंपकैर्मित्रलाभाय नीपजैर्निधिसिद्धये ७९ जातीभिर्भोग
सिध्यर्थं मल्लीसंपत्समृद्धये सर्वाभिष्टार्थसिध्यर्थं द्रोणपुष्पैः समर्चयेत् ८० तिलाक्षतैर्बि
ल्वदलैर्नित्यपूजां समाचरेत् यथाप्राक्त्यर्चयेद्दानै रतिथीन् शिवयोगिनः ८१ तोषयेत्सर्वय २०
त्नेन यथाकाले समागतं प्रत्युत्थानाभिगमने वंदनं प्रियभाषणे ८२ आसनं चान्नपानादि य

५

थाशक्त्यार्चयेच्छिवे सर्वाभावेप्यशक्तो वा विनयादिभिरर्चयेत् ८३ कल्याणिं वा वदेद्वाणीं प्रमा
दस्याद्यथान्यथा यदिच्छेद्वमानेन निराशो निर्गतोतिथिः ८४ इत्थं पूर्त्तहुतं दत्तं सर्वमादायगच्छति
अहमेव महेशानि धृत्वाजंगमविग्रहं ८५ सद्भक्तानुग्रहार्थाय पर्यटामि महीतले तस्माद्भक्त्याय
थाशक्ति पूजयेच्छिवयोगिनः ८६ लब्धमात्रे स्वगृहे शिष्टेनस्वात्मजीवनात् योर्चयेज्जंगमा
नुभक्त्या मामेवार्चितवान्स हि ८७ यो विजानाति गिरिजे समामेव न संशयः अर्चयेज्जंगमंध
न्यः संध्यायागृहमागते ८८ साक्षात्सद्रूपमीशानि शयनासनभोजनैः अनाथं रोगिणं दीनं
मूकं बधिरमेव च ८९ पंगुं मुंडं दुराचारं नावमन्येत लिंगिनं नकार्यः कलहो दवि अन्योन्यं
शिवयोगिभिः ९० नपैशून्यं नमात्सर्यं नद्रोहं नातिपीडनं नस्पृशेदायुधं क्वापि प्राणैः कंठ

३९ १

॥ गजैरपि ११ नछेदयेत्तरूं वापि लिंगमुद्रांकितं शिवे नाधिरोहेन्न तन्मूले मलमूत्रादिकं त्यजेत् १२
नदहेदिंधनं वापि मुद्रांकं वा लिंगभूरुहं पाषाणे वृषभं वृक्षे लिंगमुद्रांकितं यदि १३ नापसव्यं व्रजे
द्योगी शिवलिंगी विलोकयन् नाधिरोहेदनड्वाहं रथं वा तुरगं गजं १४ यथेच्छं विहरेल्लिंगी स्वे
पानसादुकादिभिः वृषभं लिंगमुद्रांकं दृष्ट्वा भूमौ खनेन्मृतं १५ नस्पर्शयेद्व्रतेनापेक्षेत्कादिभि
मांसलोलुपैः शैवदीक्षाविनालिंगी नैवालिंगिनमर्चयेत् १६ नैवापेक्षेतनत्पूजामर्चयेदेव लिं
गिनं पूज्योऽपि पूजको वापि लिंगी नामैव लिंगिभिः १७ नान्योन्यं नयान्योऽपमाचारं हि लिं
गिनां असमानतया नश्येत्तदाश्रयवर्जनात् १८ पूज्यः पूजककर्मादौ यद्योग्यस्स्व लिं
गिनः नदर्शनेवपूजायां दर्शनेभाषणेपि वा १९ संबंधे संगमे वापि सल्लापे सहभोजने ३९

प्रायत्नेसह्यानेवा सुखदुःखादिषुप्रिये ५०० लिंगानांशिवभक्तानां योग्याएवहिलिंगिनः ज्ञानविज्ञान
संपन्नःसर्वसाधनवानपि १ अभ्युत्थएवदेवेशि यश्च लिंगीभवेज्जनः अशिष्टोवा विशिष्टोवा भक्तो
भक्तोपिवायदि २ अलिंगिभ्योवरोलिंगि लोह्यनामिवकांचनं किमत्रबहुनोक्तेन शृणुतत्वमुमेमम ३
सर्वसिद्धांतसारोहि मन्मताश्रयणांनृणां यथादेवेषुहंश्रेष्ठो यथात्वमनघेस्त्रियां ४ यथापवर्गः
प्राप्तेषु तथाशैवमतंमम तत्रसप्तविधानांतु वीरशैवमनुत्तमं ५ तदाश्रयादृतेदेवि नतुमुक्तिर्भवेन्न
सुखं तस्मात्सर्वप्रयत्नेन जनःशैवमतंश्रयेत् वीरशैवमतंतत्र विशेषेणसमाश्रयेत् ६ इतितेक
थितंदेवि वीरशैवमतोत्तमं आचारलक्षणयुतं किंभूयःश्रोतुमिच्छसि ५०७ इतिश्रीपारमेश्वरतं
त्रेशिवाद्वैतसिद्धांतेवीरशैवदीक्षाप्रकरणेलिंगधारणस्वरूपनिरूपणंनामपंचमःपटलः ५ ७ ७

२२ श्रीगणाधिपतयेनमः श्रीसद्गुरुनाथायनमः श्रीदेव्युवाच कपर्दिन्करुणासिंधो मेरुधन्विन्महेश्वर व
दमेषट्स्थलज्ञान लक्षणं तत्फलं विभो १ ईश्वरउ० शृणुदेवि प्रवक्ष्यामि स्थलषट्कस्य लक्षणं यज्ज्ञा
त्वाजायतेसद्यः शिवएवनसंशयः २ गोपनीयंप्रयत्नेन दरिद्रेण यथानिधिः यथास्त्रिया तथागो
प्यंस्वयोनिरिवस्फुटे ३ शिवभक्तिविहीनाय दुराचाररताय च नास्तिकायनदुष्टाय वक्तव्यः ष
ट्स्थलक्रमः ४ अहमेकः परानंद परमात्मा सदाशिवः सृष्ट्वामायामयींशक्तिं तथाहं षड्विधोभवं ५
शैवदीक्षाकल्पवृक्षं तत्फलंस्थलषट्कं इतिसंज्ञां विधायाहं ममसृजन्मुक्तिसाधनं ६ अहमेवजग
त्स्रष्टा पुनर्मय्येवलीयते अहमेवस्थले विविधे षड्विधं ममरूपकं ७ भक्तोमहेश्वरश्चैव प्रसादीप्रा
णलिंगकः शरणः शिवलिंगैक्यः स्थलषट्कं ममप्रियं ८ गुरौचजंगमेलिंगे तारतम्य विशेषतः २२

पूजयेस्त्रिविधंरूपं तभ्दक्तस्थलमुच्यते ९ तदेवपृथिवीतत्वं तनुरन्यतमामम तस्याधिदेवताचाहं
सोहंदेविनसंशयः १० जंगमंपूजयेयस्तु साक्षात्मद्रूपमीश्वरं समांपूजितवानेव सोहंदेविनसंशयः
११ तस्माद्योभक्तिमान्शक्तोजंगमेषुमहात्मसु तद्भिभक्तस्थलंविधि ममचातिप्रियेशिवे १२ योगु
रूक्तेनमार्गेण लिंगपूजारतःसदा जंगमानर्चयेच्छक्त्या सहिमाहेश्वरःस्मृतः १३ त्रिकालमर्चये
ल्लिंगं ममभक्तेषुभक्तिमान् स्वमताचारनिरतः सवैमाहेश्वरःप्रिये १४ जलतत्वमिदंदेवि तनुर
न्यतमामम तस्याधिदेवताचाहं सोहंदेविनसंशयः १५ यदुक्तलक्षणेतस्मा दाचारेजंगमार्चने स्थ ल
लेमाहेश्वरंविधि ममचातिप्रीयेशिवे १६ योनार्पितंमहेशानि नार्चयित्वापिजंगमान् नाश्नाति
नत्यजेन्नस्वमर्पितंरुद्रगोपिवा १७ सोयंप्रसादीकथितः सोहमेवनसंशयः तत्प्रसादिस्थलं

२२ विधि ममत्वातिप्रियं शिवे १८ अग्नितत्वमिदं देवि तनुरन्यतमा मम तस्याधिदेवताचाहं सोहमेव
नसंशय: १९ यथाप्राणे तथा लिंगे यथा लिंगे तथा शिवे प्राणलिंगी स्थलमिदं ममत्यातिप्रियं शिवे २०
वायुतत्वमिदं देवि तनुरन्यतमा मम तस्याधिदेवताचाहं सोहमेव नसंशय: २१ ईषणात्रयनिर्मुक्तो
नियमैकांतसेवन: ममध्यानरतो नित्यं शरण: परिकीर्तित: २२ शरणत्वाधिकारीय: सदहंते
शिवाभवेत् शरणत्वस्थलमिदं ममत्यातिप्रियं शिवे २३ व्योमतत्वमिदं देवि तनुरन्यतमा मम त
स्याधिदेवताचाहं सोहमेव नसंशय: २४ नपूजा नैव चध्यानं नयोगकरणादिकं अहंताभावनाधीर:
शिवलिंगैक्यसंज्ञक: २५ यएव शिवलिंगैक्यसंज्ञक: परमेश्वर: स्थलं तच्छिवलिंगैक्यं ममत्या
तिप्रियं शिवे २६ साक्षितत्वमिदं देवि प्रधानं येतनुर्मम ममरूपमिदं देवि सोहमेव नसंशय: २७ २२

यदिदं च षट्स्थलं नाम रहस्यं परमं पदं यज्ज्ञात्वा मुच्यते सद्यो जन्मसंसारबंधनात् २८ स्थलषट्कपरिज्ञानं देवानामपि दुर्लभं मां मृते परमेशानि नान्यो जानाति कश्चन २९ त्वत्स्नेहपाशसंबद्धमनसा कथितं मया स्थलषट्कपरिज्ञानमिदं तुभ्यं निवेदितं ३० तत्र वक्ष्ये विशेषं ते शृणुष्व सरहस्यकं षडंगानि महेशानि महेशस्य परात्मनः ३१ सर्वज्ञतातृप्तिरनादिबोधः स्वातंत्र्यता नित्य

३१ मलुप्तशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य ३२ यभ्दक्तस्थलमित्याहुस्तत्सर्वज्ञत्वमुच्यते यन्माहेश्वरकं नाम सा तृप्तिर्मम शांकरि ३४ यत्प्रसादाभिधं स्थानं तद्बोधो मे निरंकुशः यत्प्राण लिंगकं नाम [illegible] तत्स्यात्तंत्र्यमुदाहृतं ३५ यदस्ति शरणं ज्ञानमलुप्ता शक्तिरुच्यते यदैक्यस्थानमूर्ध्वस्थं शक्तियनंतेति नामम ३६ एतदंगस्थलं देवि गुह्याद्गुह्य

२४ ममपरं एतानिममचांगानि चक्षुरादिन्यसंशयः ३७ एतदंगस्थलज्ञानं यद्विपुंसांमहात्मनां
सद्गुरोरुपदेशेन वर्तते सपरः शिवः ३८ नयस्यांगपरिज्ञानं नांगांगीभावबोधनं नतेनलभ्य
तेमुक्तिं दूरेस्ताहि यतःशिवे ३९ अथवक्ष्येविशेषंतेश्रृणुष्वैकमनाःशिवे उपांगषट्कंमेपरं
भक्त्यादिपरमंपदं ४० भक्तिःकर्मश्रद्धाबुद्धिर्विचारोदर्पसंक्षयः सम्यक्ज्ञानमितिप्रोक्तं
स्थलषट्कंममप्रियं ४१ कामुकस्ययथाजार कांतायामभिवेशनं यथैवलुब्धेचनिधौ दरिद्र
स्यमनस्तथा ४२ अस्पृष्टविषयस्नेहो योमोहः शुद्धसात्विकः मयीश्वरमहादेवि सभक्तिरभि
धीयते ४३ भक्तिर्मातापितादेवि कामधेनुःसुरद्रुमाः करस्थममृतयासं विद्धिभक्तिंकुले
श्वरि ४४ योभक्तिरहितोमर्त्यः समस्तानिष्फलाःक्रियाः नतस्यपरलोकोस्ति मृतःश्वानो २४

भविष्यति ४५ भक्तिहीनस्य कर्माणि वृथा पूजाजपादिकं धूतमंगलसूत्रापि विधवा नरकवा
सिनी ४६ तथा भक्तिर्वृथा यस्य तद्वशाद्गतजन्मसु प्राप्तानि बंधकर्माणि तेषां स्यात्संक्षयो
लघु ४७ दुर्वासनानुबंधानि कर्माणि प्रचुराणि च रतो भक्तिमयाशक्तिः सा नाशयति ता
नहि ४८ कर्मबंधेषु नष्टेषु बुद्धिः स्वच्छा भवत्यथ । संत्यक्तविषयादेवि स्थिरामयि परात्मनि
४९ यस्यास्ति निश्चला बुद्धिरघीशे मयि शंकरे समानुपैति भ्रमरकीटन्यायेन सुंदरि ५०
न यस्य निर्मला बुद्धिः सध्यायेद्विषयान्सदा ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ५१
संगात्संजायते कामः कामात्क्रोधोभिजायते क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः
५२ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशाद्विनश्यति नष्टस्य बुद्धिमानेति मां सर्वमयि शंकरे ५३

२९ तयागुरूक्तवाक्यार्थचिंतनं निश्चयो हृदि हितालितविवेकस्य विचारः स उदाहृतः ५४ विनागुरु
क्तवाक्यार्थविचारं न प्रयोजनं विचारे नैव जानाति सकलं कर्म शुभाशुभं ५५ एवं विचारिते शास्त्रे
ज्ञात्वा मामखिलेश्वरं स्वरूपमभिजानाति [illegible] तस्य स्यात्सर्वसंक्षयः ५६ निरस्तद
र्पसंबंधः शिवज्ञानरतो भवेत् तेन शीघ्रं गिरिस्कंते सम्यक्ज्ञानं ततो भवेत् ५७ येन भूतान्य
शेषेण द्रक्ष्यात्मन्यथो मयि प्रत्ययानुवृत्तिर्येकोन सम्यक्ज्ञानी स चास्य हे ५८ चराचरात्मकं
सर्वं भावयन्परमात्मनः ५९ ममरूपं महेशानि सम्यक्ज्ञानी स उच्यते ५९ उपांगषट्कमेतद्धि
भक्त्यादिस्थलषट्कके भक्त्यादिसर्वज्ञत्वादि भक्त्यादिक्रमशः शिवे ६० यस्य सर्वज्ञताभक्ति ३५
र्यानुत्पत्तिः कर्मसंक्षया आनादिबोधो या बुद्धिर्विचारो मस्वतंत्रता ६१ अलुप्तशक्तिरितिया

साचमे गर्वसंक्षया अनंतशक्तिरितिमे संम्यक् ज्ञानं ददातिसा ६२ अंगोपांगात्मभावेन स्थूल
षट्कस्यनिर्णयः योजानातिसदेवेशि शिवएवनसंशयः ६३ पादपाणिशिरोदेहमंगषट्कंमहे
श्वरि भक्त्यादिसर्वज्ञत्वादि भक्त्यादिस्थानषट्ककं ६४ लब्ध्वाएतत्स्थूलज्ञानं विदितःसद्गुरोर्मुखा
त् षडुर्मिसंगरहितः षड्वर्गपरिवर्जितः ६५ परित्याज्यायमहता हंकारंसशिवोभवेत् ऊर्मिवर्ग
मयेयस्य नसमुक्तोनसंशयः ६६ क्षुत्पिपासेमहेशानि शोकमोहौजनिर्मृतिः संसाराब्धूर्मयश्चे
ता यथाध्यात्मयस्तथा ६७ क्षुत्पिपासेप्राणधर्मौ शोकमोहौमनोगतौ जननंमरणंचेति देह
धर्मौषडूर्मयः ६८ भवंस्यप्राप्यदुःखाय प्राप्यापिचतथैवहि आगमापायिनोनित्यंनस्वस्थंस्या
पयंत्यमी ६९ अतऊर्मिवदूर्मित्वं तद्दुःखजनकंनृणां तेषा■मिदंसहायोहि वर्गषट्कंदुरात्मवं ७०

३६ कामक्रोधश्चलोभश्च मोहश्चमदएवहि मात्सर्यंचक्रमेणैतद्वर्गषड्रिपुरुच्यते ७१
अरिवत्स्थितिकृत्वा दरिषड्वर्गमुच्यते तदूर्मिषट्कमरिषड्वर्गस्य त्यक्त्वाविमुच्यते ७२ भक्तादिसम्य
क्स्थानांम मुत्तरोत्तरमुत्तमं साधनंपूर्वपूर्वस्या स्साध्यंस्यादुत्तरोत्तरं ७३ ऊर्मिवर्गविहीनस्य
सम्यक्स्थानाधिकारिणः सुस्थानस्थलषट्कस्य मुक्तिःकरतलेस्थिता ७४ यस्यप्रियोहमीशानि
सममासीत्प्रियोयतः उक्तलक्षणसंपन्नः सोहमेवनसंशयः ७५ एतत्पुण्यफलाद्वीरशैवदी
क्षाधुरंधरः त्रिसंध्यमनयास्तुत्या स्तुवन्मामेवमद्विजे ७६ नमःशिवायरुद्राय नम ॐकाररू
पिणे भक्तस्थलस्वरूपाये शिवलिंगायतेनमः ७७ गजचर्मांबरभृते व्याघ्रचर्मधरायते महेश
स्थलरूपायशिवलिंगायतेनमः ७८ कपर्दिनेसकालाय ककुद्मिध्वजशोभिने प्रसादस्थल ३६

रूपाय शिवलिंगा० ७९ नमः परात्मनेतुभ्यं प्राणलिंगि स्थलात्मने शुद्धस्फटिकवर्णाय शिव
लिंगा० ८० नीलकंठायनित्याय निर्मलायपरात्मने शरणस्थलरूपाय शिवलिंगायतेनं० ८१
त्रिशूलमृगहस्ताय कुठाराभयपाणये शिवलिंगेक्यरूपाय शिवलिंगायते० ८२ नमोदक्षम
खांताय नमोधंकविघातिने नमः सर्वेशरूपाय शिवलिंगाय० ८३ पार्वतीशायपृथवेपराय
परमेष्ठिने नमस्तेनित्यरूपाय शिवलिंगायतेनमः ८४ नमस्तेवेदरूपाय नमः कंथानिषंगिणे य
नमस्त्वनादिबोधाय शिवलिंगा० ८५ नाटिनाखिभूताय नगजार्धशरीरिणे नमस्तंतंत्रतंत्रो
शिवलिंगा० ८६ नमः शशांकचूडाय शशांकायुतरोचिषे अलुप्तशक्तयेनित्यं शिवलिंगायते० ८७
निश्वासोत्पन्नवेदाय साक्षीभूतत्रयीमते नमस्तेभक्तिरूपाय शिवलिंगायतेनमः ८८ नमः

३७ कैलासवासाय नमस्ते त्रिपुरघातिने नमस्त्वनंतशक्तीने शिवलिंगा० ८९ कमलो ... भवंवध्या
य कपर्दीजटिलेनमः कर्मक्षयात्मने तुभ्यं शिवलिंगा० ९० नमोगणेशायनमो नमस्ते स्कंदसुन
वे नमोबुधिस्वरूपाय शिवलिंगा० ९१ गंगाधरायगौरीभर्त्रे गौरीवक्त्रावलोकिने नमोविचाररू
पाय शिवलिंगायतेनमः ९२ विश्वेश्वरायविश्वाय विश्वरूपायवेधसे दक्षयज्ञस्वरूपाय शिव
लिंगा० ९३ सर्वाधारायसर्वाय सर्वात्मनिलयात्मने सम्यक्ज्ञानस्वरूपाय शिवलिंगाय० ९४
नमश्चिद्घनरूपाय सच्चिदानंदमूर्तये समग्रैश्वर्यरूपाय शिवलिंगायतेनमः ९५ मृत्युंजयायरु
द्राय त्र्यंबकायत्रिमूर्तये माहावीर्यायवीराय शिवलिंगायतेनमः ९६ वेदवेदांतवेद्याय वेदध्याय
विवेकिने महसेयशसेतुभ्यं शिवलिंगायतेनमः ९७ सोमसूर्याग्निनेत्राय नमस्तेव्योममूर्तये ३७

नमोमहाश्रीरूपाय शिवलिंगायतेनमः ९६ निराकाराय कथये करुणायकल्लोलने नित्यज्ञानस्वरू
पाय शिवलिंगायतेनमः ९९ सूर्यकोटिप्रकाशाय सूक्ष्माय स्वरूपिणे शुद्धवैराग्यरूपाय शिवलि० १००
नमः षड्भाग्यरूपाय नमः षड्भाग्यदायिने भुक्तयेमुक्तिसंधात्रे शिवलिंगायतेनमः १ अतीतव्यष्टतत्वा
य अष्टतत्वस्वरूपिणे पंचविंशात्मतत्वाय शिवलिंगायतेनमः २ वृत्तं वरदमृगकुठाराभीतिहस्ता
बुजाय स्फुटमुकुटविराजच्चंद्रमःशेखराय मृदुविमलदूर्वाश्लिष्टभूभृत्सुताय प्रणवमयनमःश्री
शंकरायोनमस्ते ३ ईतिस्तुवीतयोभक्त्या त्रिसंध्यंप्रत्यहंशिवे तद्दृष्टिगोचराःसर्वे शिवएवनसंश
यः ४ एतद्विज्ञानतोदेवि नान्यदस्तिततःपरं ज्ञातव्यंपरतत्वाख्यं सोहमेवनसंशयः ५ अनेनस्त
व[illegible]राजेन भावयन्मामधीश्वरं देहांतेसर्वदाप्नोति ममसायुज्यमव्ययं ६ विचारयेदतदर्थं

२६ सम्यग्गुरुमुखाल्लिव्वे नसभूयोनिपतति संसारे दुःखसागरे ७ परित्यज्यापिसर्वस्वं सर्वयत्नेनस
र्वदा सर्वदावर्त्तयेदेतच्चदिव्यस्करवमात्मनः ८ ९ ततेकथितं देवि षट्स्थलज्ञानमुत्तमं सफलंल
क्षणयुतं किंभुयःश्रोतुमिच्छसि १० इतिश्रीपारमेश्वरतंत्रेशिवाद्वैतसिद्धांतेदीक्षाप्रकरणेषट्स्थल
निरूपणंनामषष्ठमःपटलः ६ श्रीरामजयरामजयजयराम हरिपुरुषोत्तमराजाराम सुंदरमा

श्रीदशरथात्मजायनमः श्रीगुरुनाथायनमः श्रीसांब श्रीदेव्युवाच निस्तरंगसुखबोधो नौका २६

श्रीगुरुशंकर नमस्ते निर्विकाराय निर्विशेषाय शंभवे १ कथितानि त्वयान्यानि यानि सत्यवि
धानि मे वीरशैवादिभेदेन शैवं सप्तविधं त्विति २ उपक्रमेणानाथ्यादि मतानां लक्षणादिकं य
द्वा त्वामनुजः सद्यो वीरशैवे प्रवर्तते ३ ईश्वर उ० शृणु त्वेकमनादेवि महात्म्यं तु मनस्यमे अ
नादिशैवभेदस्य लक्षणाचारमादितः ४ प्रवेशमात्रेणमते कामुक्तिरविवेकिनां विनात्वरूपवि
ज्ञानं ममशंभोरनुग्रहात् ५ कृतपुण्यानुसारेण प्रवेशो लभ्यते मते ततो यदिमवेश्रीमान् जाग
रूकोमवेद्दृढः ६ यथोक्तं गुरुणा शास्त्रे तत्तथा वर्तयेत् सदा तदुक्तमनुतिष्ठेत न त्यजेत् रूपगोपि
ये का ७ त्रिकालमर्चयेन्नित्यं ममलिंगमतन्द्रितः जंगमानर्चयेद्भक्त्या स्वशक्त्यान्नोदकादिभिः ८
हृष्टो भवति संतुष्टो न शोचति लोकवत् न बध्यते जिनो मोक्षे सोनादिमतमाश्रयेत् ९ प्र

३९ मादेकुस्लेप्रायश्चित्तं साकल्यसिद्धये भृशंचरेत्कुभप्रासौ अशुभेशुभमाचरेत् १० तदनादिम
तंशैवं नादिसोपानकंयदा ततो यदि विशेषस्स्वादिशैवमतंमाश्रयेत् ११ शक्त्या समर्चयेदन्नै
र्जंगमान् गृहमागतान् त्रिकालमर्चयेल्लिंगं मादिशैवमते शिवे १२ यथाशक्त्याचरेत्तोषमशक्तं
न. न वर्जयेत्कचित् नाश्रयन्नापि वर्तेत सोनादिरधिकः शिवे १३ अर्चयेदेककालं वा लिंगमेजंगमा
नपि ममध्यानपरो नित्यं मनुशैवमतो भवेत् १४ ज्ञाने नाधिकता यस्य शास्त्राभ्यासपाठ
नात् ततस्य कर्मबाहुल्ये ज्ञानमेवाधिकं परं १५ तद्विशेषाधिकारी यो मतभेदं सुधीबलात्
कामादिरहितः शांत उत्तरोत्तरमाश्रयेत् १६ नाधिकारं विना मूढो मतमुत्तममाश्रयेत् सोवश्यं
निपतेद्घोरे वृक्षाग्रच्युतपादवत् १७ वृक्षसाधनसंपन्नः सगच्छेदुत्तरोत्तरं संतरेदखिलं दुःखं ३९
स्रोतसीव दृढो द्रुमः १८ अथवक्ष्ये महाशैवे नविनाजंगमार्चनं तत्प्रसादं विना ज्ञानि महाशैवमतस्थितः १९

सत्वपेक्षयनादीनि पूजायैशंकरेर्पयेत् सर्वेंद्रियनिवृत्तोपि शिवमेवार्चयच्छिवे २० चराचरात्मकं
सर्वं जगदेतच्छिवात्मकं भावयन्नात्मनादात्म्यं योगशैवमनेवशेत् २१ नबाह्यपूजानाचारो नैव
जंगमपूजनं नप्रस्फुरत्यानमन्यस्य योगशैवमतेमम २२ विविक्तदेशमाश्रित्य परित्यज्यधनादि
कं निर्ममोनिरहंकारो ध्यायीनात्मानमीश्वरं २३ जगल्लिंगमयंपश्य ल्लिंगमद्रूपमीक्षयेत्
ममात्मानेपरेध्याये योगशैवमते स्थितः २४ नदेवज्ञानशैवाख्ये ज्ञानस्य ज्ञानेमुत्तमं जग
तदात्मकंज्ञानं महाज्ञानमितीश्वरि २५ नध्यानेनापिवायासो नार्चाजंगमलिंगिनो नयोगधा
रणेज्ञानं शैवस्यस्य ममप्रिये २६ योज्ञानशैवमतगो षडुक्तकर्मनिहितः सजीवन्नेवविश्वे
शि शिवोहंनात्रसंशयः २७ एवंक्रमेण सोपानेमतभेदैममाश्रयेत् परित्यक्तक्रमतोगच्छे

४० स्मपने नात्र संशयः २८ यदाग्निस्योत्तरं भेद मथान्या तदनुष्ठितौ पूर्वभेदानुसरणात् स्मप
ने नात्र संशयः २९ ज्ञानाधिकारसिद्ध्यर्थं माचरेत्कर्मचोदितं ज्ञाननिष्ठाबले नैव त्यजेत्क
र्माणि नान्यथा ३० विना ज्ञानाधिकारेण शक्त्या कर्माणि यस्त्यजेत् तया निपारं दुःखस्य
विषयेष्ववसीदति ३१ दीक्षाहोमादिकं सर्वं सर्वत्र सममेव हि आचारश्चापि भक्तिश्च स
मा सर्वमतेष्वपि ३२ लिंगस्य पूजनं नित्यं जंगमानां च पूजनं कर्तव्यं नियतो भक्तिः सर्वभेद
ष्वपि प्रिये ३३ अनादिशैवनिष्ठस्य कर्मैव परमा गतिः आदिशैवमतस्थस्य स्मरणं सत्
तं विधिः ३४ अनुशैवमतस्थस्य मननं मुख्यसाधनं महाशैवमतस्थस्य निश्चयः परमा गतिः ३५
योगशैवमतस्थस्य ज्ञानयोगो हि साधनं विना ज्ञानेन योगः स्यान्न ज्ञानं योगतो विना ३६ नवि ४०

नाज्ञानयोगाभ्यां वीरशैवमतमाश्रयः संजारणायभवते स्ववत्नेनात्रसंशयः ३८ यथावीरोरणे
शूरो वीरशैवमथ नेतथा भक्त्या वीरो नवैरेण नबलेन च कार्यतः ३९ नमांसं भक्षयेल्लिंगी
नाप्यपेयं पिबेत्क्वचित् नाभक्ष्यं भक्षयेद्दृष्ट्वा नानावस्यनिमित्तकं ४० नास्माधर्मं याचयेद्दिष्टं नाथा
न्यातिथ्यनार्पितं शत्रुयासे पूजयेल्लोके जंगमं गृहमागतं ४१ नाध्यादलिंगिनश्चान्नं दृष्टंचा
नमलिंगिना याचयेद्गृहमागतं दद्यादन्नमलिंगिने ४२ नोदासीनं नच द्वेषं नहिंसानापिवंचनं
कुर्यान्नलिंगियत्नेन विमते चाप्यलिंगिषु ४३ पूज्यपूजकभावाद्दो भोजनादिषु कर्मसु विमनत्वा
दयोग्यत्वा देवमेवाखिलं जगत् ४४ गृहमायो नमाल्लोक्य गुरुं वागुरुमेव वा योगृही भवती नम्रः स
गुरुर्नैनरः क्वचित् ४५ नद्यागतं गृहे वीक्ष्य प्रत्युत्थायाभिवादयेत् श्रमापनोदनं कुर्यात्स्वजना

दिभिरादरात् ४६ प्रणम्यस्वागतं ब्रूयात्पादप्रक्षालनं चरेत् प्रथमं पूजयेद्गंधपुष्पैः संक्षाल
येत्ततः ४७ अंगुष्ठे भावयेद्रुद्रं तर्जन्यां शंकरं स्मरेत् मध्यमायां महादेवमनामिक्यां त्रियंबकं ४८
कनिष्ठिकायामीशानं पादोपरि कपर्दिनं पादाधः पंचवदनं गुल्फयोरस्यभर्गको ४९ सर्वलिंग
मयं ध्यात्वा पादे जंगमलिंगिनः पिबेत्संक्षालितं तोयं पीत्वा शिरसि धारयेत् ५० न पातयेद्यो बिं
दुं पादप्रक्षालनोंभसां पुनः संपूजयेद्गंध पुष्पधूपादिभिः क्रमात् ५१ स्त्रियो वा पुरुषो वापि सर्वे
ऽतिथिपूजने पुंभिः पुंसां स्त्रियां स्त्रीभिः दद्याद्गंधादिकं करे ५२ न जातिभेदस्तत्रास्ति लिंगि
नां शिवयोगिनां न दृष्टिस्पृष्टदोषो वा सर्वा एव शिवाः शिवे ५३ गुरुर्लिंगं जंगमश्च पादतीर्थं
प्रसादकं देहे विभूति रुद्राक्षो मम पंचाक्षरी मनुः ५४ अष्टावरणसंयुक्तो वीरमाहेश्वरा नराः

ममरूपधरा देवि विचरंति महीतले ५५ नत्यजेल्लिंगिना भुक्तं शिष्टमुच्छिष्टधीहतः नक्षाल
येच्छ्रुतत्पात्रं नभेदं तत्र कारयेत् ५६ येन केनापि भुक्ते तु लिंगिनोच्छिष्टपात्रके पात्राभावे क
व्र कालादौ सर्वप्यश्नंति लिंगिनः ५७ न ब्रह्मस्त्यानक्षत्र वृत्त्या नो वैश्यवृत्तितः न शूद्रवृत्त्याजी
वेत यदि लिंगी हतेस्करवं ५८ नवै प्रतिग्रहे दानं न कुर्यान्नातिसंग्रहं यथास्तु भक्तिसस्तुरवं नो
चेद्भिक्षाटनेचरेत् ५९ पक्वं च लिंगिनामेव नान्नादिकमलिंगिनो गृह्णीयादेवि यत्नेन स्वप
क्वं सर्वजातिषु ६० नाश्नीतदद्यात्सपक्वं च स्वस्यान्नस्य यथारुचिः योग्येस्यादन्नपानादि ०
नश्रेष्ठानाप्यलिंगिना ६१ यत्नेन याचयेदन्नं यदिस्तुलिंगधारिणः अभावेयाचयेदन्नमप
क्वंचाप्यलिंगिनः ६२ नदद्यात्स्वयमयत्तत्कं पक्वमप्यशुचेः प्रिये जातिभेदो न कर्तव्यः पा

अपक्वं नपिबेत्तोय मलिंगीस्प
ष्टमीश्वरि ६१ चांडालेनापि देवे
शि संस्पृष्टं धृतलिंगिना

२

फलेदोनगोरसा ६४ नसूर्यकिरणास्पृष्ट मुदकं शिवपूजने योग्यंतदानयद्रात्रौचोदयात्पूर्व
तोरवेः ६५ यथाकाशंप्रतिफले न्नचरांतस्थितांभसि तदाच्छाधदद्भांडुमुखंसूदकमान
येत् ६६ नभुमौप्रक्षिपेत्काष्ठादि विनापूजास्थलेशिवे यधन्यत्रक्षिपेत्कुंभ मश्नुयंभःपरि
त्यजेत् ६८ पत्रपुष्पादिपूजार्थं यद्यालिंगिसमाहृतं तेनार्चयित्वागिरिजे रौरवेनरकेवसेत् ६९
यदानीतंत्वस्तुचिना लिंगिनाप्यर्चनायमे संपूजयित्वामांदेवि रौरवेनरकेवसेत् ७० तदुत्थाय
शुचिर्भूत्वा धृतरुद्राक्षभस्मकः जपन्पंचाक्षरंमंत्रं स्मरन्वानाममेशिवे ७१ मौनीनिरस्तचे
ष्टःसन् नदिशोन्याविलोकयेत् ध्यायन्सुखेपुमांदेवि त्वयासहलुनेत्रनेः ७२ अकीटक्रि
मिदष्टानि अविछिन्नदलानिच आनूतनान्यपूर्वाणि पक्वान्नवलुनेछिवे ७३ तदारु

२

मृण्मये पात्रे न हस्ते न च वाससि पर्णादौ मृत्तिकादौ वा पुष्पपात्रादिकं क्षिपेत् ७४ नाम्भोनि
क्षिपेत्पुष्पं नाम्बुधेन शरीरके स्थापयेद्दं विके शुभ्रं देवतायतनं विना ७५ नार्द्रैस्तिलाक्षतैर्देवि
पूजयन्निम्नवज्जलैः नीरसैः क्षालितैः शुभ्रे रत्नांकुरैरर्चयेत्कुसुमैः ७६ सिकताः रुणनैल्यादि रहि
तैश्च तिलैरपि त्रिकालमर्चयेन्नित्यं समभागैस्तिलाक्षतैः ७७ करवीरैर्द्रोणदूर्वाबिल्वप
त्रैस्तिलाक्षतैः अर्चयेन्नित्यमीशानि पंचपुष्पैरतन्द्रितः ७८ यत्नतो निपूजायै पैत्तैतासुसाध ´ य
येत् यथाद्रव्यस्करवाल्लब्धमधिकस्याधिकं फलं ७९ धत्तूरैरर्कपालाशैः कमलोत्पलपाट
लैः नीपचंपककपुन्नागैर्मधूकवकुलादिभिः ८० नागकेसरशाबंतिनीलीकुरुबकैरपि
मल्लिकाजातिकल्हारैर्गन्धिवन्यैरनेकशः ८१ पुष्पाणि संति पत्राणि सुलभानि धरातले

अनायासेन संपाद्य पूजयेन्मां यथासुखं ८२ शम्यापामार्गतुलसीबृहत्यस्मांतमर्द्धनं विष्णु
क्रांताचामलकं देवदार्वादिकानि च ८३ यत्साध्यमत्यायासेन यत्प्रयत्नेन दुर्लभं यदसह्यं विशे
षेण न संपाद्यं चर्येहि तं ८४ सक्तुभ्रंशी न लेऽरम्यं मधुरं लघुपावनं यत्नेन जलमानीयाभि
षिंचेन्मां यथाबलं ८५ प्रत्यहं यावदुत्थानं यावत्स्वापः पुनर्निशि तावत्स्वलिंगसेवार्थे कालेऽया
पनुयेत्सुधी ८६ न विना मम दास्येन न विना लिंगपूजनं तद्दैवत्सुखलाभाय यथ स्यान्मम पोऽज
नं ममसेवा नयो देवि ममसेवाव्रतेशिवे ममाभ्ययोहि कैवल्यं धीमतो सुखमिच्छतो ८८ यथाध
स्याक्षितलाभेन निधिलाभाद्दरिद्रिणः क्षुधितस्यान्नलाभेन कामिनः कामलाभतः ८९ कामि
न्यास्सुदरस्याप्यस्य पुत्रलाभे त्वपुत्रिणः पंगोः शरीरसार्ढेन जीवने नष्टपुनर्मृते ९० तथाविधिमते

देवि ममशैवंमहत्तरं तन्मंथनोत्थितंसारं वीरशैवपरंशिवे ११ निष्ठाभेदेनमर्त्यानां भेदावंतर
भेदतः कल्पिताहिमयाभेदा ज्ञानमेकंहिकारणं १२ अंधेननीयमानोंधो निपतेत्सहतेनसः
यथातथानभिज्ञस्य वीरशैवेमतेमम १३ कृपाणधारागमने व्याघ्रकर्णावलंबने वीरशैवमतं
देवि सत्यंत्वविदुषांमम १४ अनायासंतपश्चर्यं शैवलब्धंननोषणं शिवपूजासदादेवि केवल
ल्मेशिवलिंगिनां १५ तत्रमुख्यो नयोमूढस्त्यक्त्वास्वाचारमुत्कवत् भस्येतपश्यन्नितिरिजे सदा
विषयलेपटः १६ मुक्तिमार्गोयमीशानि शक्तोशक्तःसमोसमः धीमानेतित्सुखंतेन नधीमान्नि
पतेत्क्षवे १७ विषयाग्निशिखादीर्घं तपश्चर्यानबाध्यते अभ्येत्यद्रावयन्नित्यं ततोविजनमा
श्रयेत् १८ अहेरिवगुणाद्भीतः सन्मानस्मरणाद्विष कुणपादिवस्त्रीभ्यो वीरशैवःसउच्यते १९

देवलब्धेन संतुष्टः सर्वद्वंद्वविवर्जितः शिवध्यानरतो नित्यं दृढचित्तो जितेंद्रियः १०० त्रिकाल
मर्चयेल्लिंगं शिवपंचाक्षरीं जपन् कीर्तयन् शिवनामानि शिवोहमिति भावयन् १ जगज्जीव
मयं सर्वं चैतन्यमयविग्रहं पंचाक्षरमयं लिंगं लिंगं पंचाक्षरं जगत् २ जगदात्मनि संपश्यन्ना
त्मानं जगतीक्षयन् जगदात्मानमीशानि पश्यन्नेव विशेषतः ३ तदधिकारसंपन्नो वीरशै
वमनाश्रयेत् दृढवैराग्यसंपन्नो गुरुस्नेन विधानतः ४ यः शास्त्रविधिमुत्सृज्य वर्तते कामका
रतः न स सिद्धिमवाप्नोति न सुखं न परां गतिं ५ तस्माच्छास्त्रं प्रमाणं हि कार्याकार्यव्यवस्थितौ
ज्ञात्वा शास्त्रविधानोक्तं तत्त्वं कुर्याद्गुरोर्मुखात् ६ इति ते कथितं देवि मतभेदमनुत्तमं रहस्यं
वीरशैवाख्यं किं भूयः श्रोतुमिच्छसि १०७ इति श्रीपारमेश्वरतंत्रे दीक्षानिरूपणं नाम सप्तमः पटलः ७

श्रीलिंगावराय नमः श्रीरामचंद्रायनमः श्रीदेव्युवाच चिन्मयानंदविज्ञान गगनायमाहात्मने नम
स्त्रिशुलहस्तायपन्नगोपतयेनमः १ कथितंमततभेशास्त्रे सप्तसंख्या नवानघ वीरशैवमतं तत्र वि
शेषेणाभिवर्णितं २ वीरत्वंनामभगवन् विज्ञेयंतु कथंमया प्रविश्यवीरशैवेतु किंवाकार्यंहि
लिंगिनां ३ भक्त्यामनाश्रयं कृत्वा वैराग्यशिथिलेंद्रियः पुनरागत्यविषयान् कांगतिंशिव
गच्छति ४ एतत्क्रमेणविभ्येशा वदविस्तरतोमम तारतम्येनयत्प्राप्यं प्रवृत्यागच्छवाहरा
न् ५ ईश्वरउवाच शृणुदेविप्रवक्ष्यामि यन्मात्वंपरिपृच्छसि सरहस्यंसविस्तारं महिमानंमतस्य
मे ६ वीरत्वंनामदेवेशि यथावीरोरणेभटः तथामतेचसद्भक्त्या वीरोवैराग्यतोदृढात् ७
ईषणत्रयनिर्मुक्ता ज्ञानविज्ञानतत्परः दृढवैराग्यसंपन्ना वीरास्ते शिवयोगिनः ८ श्रं

धायल्लिंगिनो देवि परस्त्री रूपदर्शने युवा नश्यापि पटव स्ते वीरा शिवयोगिनः ९ येमृक्का लिंगिनो
देवि परदोषानुवादने सर्वशाअपिवाचाला स्ते वीराः शिवयोगिनः १० येपंडा परकांतासु पं
गवो येन्यपीडने अजिह्वा यरसास्वादे वीरास्ते शिवयोगिनः ११ अमानिजोदंभिनश्च हिंसा
क्षांत्यार्जवान्विताः आचार्योपासनावीरा वीरास्ते शिवयोगिनः १२ शौचात्मनिग्रहस्थैर्य रन
म हंकारशालिनः सर्वत्रसंविभागम वीरास्ते शिवयोगिनः १३ विमुक्तभगकाममपिये येवर्वैकां
तसेविनः ममभावनरता नित्यं वीरास्ते शिवयोगिनः १४ स्मरणं कीर्तनं केलिः प्रेक्षणंगुह्य
भाषणं संकल्पोध्यवसायश्च क्रियानिवृत्तिरेव च १५ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं १६ नदुष्कलक्षणो ब्रह्मचर्यव्रतपराहियो योगि

नोयमहात्मान स्तेवीराःशिवयोगिनः १७ सत्यव्रूतोक्तिनिरता आस्तेयध्यनतत्पराः अपरिग्रह
शीलाये वीरास्तेशिवयोगिनः १८ अद्वेष्टारोधिकेस्वस्मात् स्वसमोष्टानसूयवः अतिरस्का
रिणोनूने वीरास्तेशिवयोगिनः १९ स्पर्धासूयातिरस्कार वर्जिताःशांततेजसाः ममध्यानपरा
नित्यं वीरास्तेशिवयोगिनः २० धृत्वाकाषायवसने भिक्षाटनपरासदा शिवध्यानरताःशुद्धा
वीरशैवाहिनेशिवे २१ वीरशैवव्रतस्थस्य नान्यत्कार्येहिविद्यते ममपूजांविनाध्याने स्मरणे
कीर्तनेविना २२ यदेत्तिष्ठतिनिद्रेण स्मरेन्नेवगुरुंशिवे उत्थायचिंतयेद्देविगुरुंमांलिंगरूपिणं २३ ग
विसृष्टः पूर्ववसनः शुद्धवस्त्रधरः शुचि प्रक्षाल्यपादौहस्तौच धृतरुद्राक्षभूतिकः २४ भ
स्मशुद्धंसमादाय मृद्दुनायदपेक्षितं पात्रमध्येविनिक्षिप्याच्छादयेत्पुनरन्यतः २५ वाम

हस्ते विनिक्षिप्य तांच दक्षिणपाणिना शैवं पंचाक्षरं मंत्रं शतमष्टोत्तरं जपेत् २६ नमो भवाय रुद्राय शर्वायोमायशंभवे नमो विभूतिरूपाय सिद्धरूपाय ते नमः २७ ततः शुभजलं हस्ते नाभ्यामुपजपन्मनुं सहतारेण मूलेन स्नापयेद्भस्म नांभसा २८ इति मंत्रेण संमर्द्य संकृत्वा यदपेक्षितं प्रत्यंगमेतैर्मनुभिर्धारयेत्तच्छिरः पदः २८ मूर्ध्नि प्रणवेनादौ भाले पंचाक्षरेण वै सद्योजातेनाक्षियुगे वामदेवेन कर्णयोः २९ कंठे घोरेण मंत्रेण शयोस्तत्पुरुषेण तु वक्ष सीशानमनुना सर्वैर्नाभावथोदरे ३० नमः शिवाय रुद्राय भवाय ा हृदये शिवे नमउग्राय कालाय न्यसेज्जंघाद्वये तथा ३१ नमः शिवाय शांताय पादयोरुपरि न्यसेत् पादांगुलीषु दयास्तु मंत्रैरेतैर्विलेपयेत् ३२ वामपादकनिष्ठादि क्रमाद्भस्म विलेपयेत् दक्षपादे

कनिष्ठानं प्राद क्षिणएयेन सुंदरि ३३ नमस्तेतुर्ध्व लिंगाय ऊर्ध्वलिंगायते नमः नमो हिरण्य
लिंगाय हिरण्याय नमो नमः ३४ नमः सुवर्णलिंगाय सुवर्णाय नमो नमः नमस्ते दि
व्यलिंगाय नमो दिव्याय ते नमः ३५ नमो भवाय लिंगाय भवलिंगायते नमः नमः शिवा
य लिंगाय शिवलिंगायते नमः ३६ अग्निमंत्रद्वयेनाथ गुल्फयोर्विन्यसेत्क्रमात् विन्य
से दक्षिणे बाहौ भुजेचापि च कूर्परे ३७ मणिबंधे तथा वाम बाहौ चा भुज कूर्परे ३८ मणि
बंधक्रमशो तं मंत्रै भस्म स्कंधारयेत् ३९ ज्वाला य ज्वललिंगाय नम आत्माय ते नमः आत्म
लिंगाय च नमो नमस्ते परमाय च ४० नमः परमलिंगाय शिवाय परकंदरे नमस्त्रिलिंगे पृष्ठ ९२
महादेवायते नमः ४१ नमस्ते शंभवे तुभ्य मलिकाक्षाय कक्षयोः सहस्रारेण मूलेन सर्वांगे

भस्मलेपयेत् ४२ न क्षालयेत्करो धृत्वा शरीरे भस्म सुंदरि निपतंतस्य यो बिंदुरेनं पातयति
ध्रुवं ४३ ततो गुरूक्तमार्गेण मम पंचाक्षरं जपेत् सहस्रं त्रिशतं वापि शतमष्टोत्तरं तु वा ४४
जप्त्वा न दनुदेवेशि स्तुवीतानेन निश्चशः भावयन् शिवलिंगात्मा गुरुणामेकरूपतां ४५ न
मः शिवाय गुरवे गुरवे शिवरूपिणे शिवलिंगाय गुरवे शिवाय गुरवे नमः ४६ सद्योजाताय
सत्याय सत्यारामाय ते नमः नमो भवोद्भवायाथ शिवाय गुरवे नमः ४७ नमोऽष्टमूर्तये तुभ्यमष्ट
त्रिंशत्कलात्मने नमस्ते वामदेवाय शिवाय गुरवे नमः ४८ नमो ज्येष्ठाय श्रेष्ठाय कालाय कलिवि
रिणे नमो बलाय देवाय शिवाय गुरवे नमः ४९ नमो बलप्रमथिने मनोन्मनाय ते नमः न
मस्ते घोररूपाय शिवाय गुरवे नमः ५० सर्वेभ्यः सर्वशर्वेभ्यो घोरघोरतराय च नमस्ते रु
द्र रूपेभ्यः शिवाय गुरवे नमः ५१ नमस्तत्पुरुषायाथ महादेवाय ते नमः नमस्ते वीरशैवाय

शिवायगुरवेनमः ५२ वीरशैवमतेशाय महावीराय शंभवे नमस्तेवीरशैवाय शिवायगुरवेनमः ५३
ईशानाय नमस्तुभ्य मीश्वरायनमोस्तुते मीढुष्टमायमहिते शिवायगुरवेनमः ५४ स्कंधुल्क
फालकूटाय रुद्रद्राय प्रचेतसे पराय फणिभूषाय शिवायगुरवेनमः ५५ गंगाधराय गौराय
गौरीनाथाय विद्महे धीमही शायदेवाय तन्नोरुद्रः प्रचोदयात् ५६ शिवलिंगांगुरवे गुरवे य
शिवरूपिणे लिंगप्राणैकरूपाय प्राणलिंगायतेनमः ५७ एतैर्द्वादशभिः श्लोकै स्त्रिकाले
प्रत्यहंशिवे पूजयित्वास्तुवेन्मांयो लिंगरूपिणमव्ययं ५८ नित्यभावयतोमर्त्यो नराणांचर्मच
क्षषो धृत्वामानुषरूपेण शिवोहंपरमार्थतः यस्मिन्दिनेपठेत्स्तोत्रमिदंभक्त्योषसिप्रिये ५९
तदेवस्तुदिनेतस्य नान्यथापरमार्थतः समाप्योषसिकेकर्मप्रयतोनिर्गमेद्बहिः ६० यद्यस्ति

४६ भक्तिशक्तिश्च पूजयेद्दुषसीश्वरं यावज्जीवेन देवेशि पत्रपुष्पाक्षतादिभिः ६१ संपाद्य पूर्व
दिवसे सर्वदोषक्षिपूजयेत् नित्यपूजाविषक्तिशिवे मध्याह्ने सायमेव च ६२ सायंप्रातरशक्तोनुपू
जयेत्सर्वदोषक्षि शक्तावुपस्यार्चनायां मर्चयेदन्यथा शिवे ६३ संध्यायामर्चयेन्नित्यं यथारुचि
तयाभवेत् नित्यंत्रिकालतो नित्यं मध्याह्नेर्चनमेकिके ६४ नित्यंप्रातश्च सायेव पूजानित्यक
दाशिवे अशक्तश्चासहायश्च यथेष्टं पूजयेत्सदा ६५ शक्तोपियो नकुरुते रौरवे नरके वसेत्
सत्यामपि च सामग्र्यां शक्तावपि समार्चने ६६ नपूजयेच्च शाठ्येन कामुको विषयातुरः कर्म
शानो भयभ्रष्टो निमग्नो दुःखसागरे ६७ रौरवे नरके घोरे वसेदाचंद्रतारकं भूतानां प्राणि ४६
नः श्रेष्ठ बुद्धिमंतस्ततोधिकाः ६८ ततस्ततोपि च बृहद्बहुधा सृजया पुनः सर्वोत्तमाये

मनुजास्तत्रविप्रामहोत्तमाः ६९ वेदिनः कर्मकर्त्तारस्तदर्थज्ञोविशेषतः ततोवेदांतसार
शास्त्रतःसन्यासिनःपराः ७० ततःपाशुपताःश्रेष्ठा लिंगिनस्तुततोधिकाः ततोधिका
महाश्रेष्ठाः वीरमाहेश्वराशिवे ७१ ततेभ्योप्यधिकःकश्चि द्वीरशैवाश्रयात्परः तावन्महि
मसंपन्नोवीरशैवःपरःशिवः ७२ साक्षान्मद्रूपतामेत्य वीरशैवमतंभवेत् निगृहीतेंद्रिय
ग्रामःस्वविवेकसमाश्रयः ७३ यदिस्याद्ध्याननिरतस्सततंह्विविधेलघु सयथ्यदृढवैराग्यः
सरागीविषयातुरः ७४ सभूयोजायतइति तदुःखायसुखायहि तयावद्दृढवैराग्ये तयावद्धि
घयास्पृहा ७५ ततावल्लभतेमुक्तिं विधूयविषयोयतः यदाविनाशःप्रारब्ध कर्मणःफल
भोगतः ७६ संचितस्यस्यविज्ञान मसंश्लेषात्तदेष्यतः सवासनेमहादेवि भक्तस्यशिवलिंगिनः ७७

४८ वीरशैवमतस्थस्य मुक्तिः करतले स्थिता द्वैविध्यं व्यवहारस्य यद्गनाशः स्ववासने ७८ य
देवाखंडविज्ञानं वीरशैवस्तथा भवेत् अनालक्षितलोकोयः सर्वदान्नमिताशनः ७९ अजा
गरूकस्त्वासमो वीरशैवः समुच्यते यदि मध्ये ऽक्रमेणैव सोनायासेन मुच्यते ८० आरूढस्य यः
पतेद्भूयो व्यवधानेन मुच्यते नहि कल्याणकृत्कश्चिद्दुर्गतिं देवि गच्छति ८१ धृत्वा लिंगं मम
शिवे कथंयास्यति रौरवे प्राप्य पुण्यकृतान् लोकानुषित्वा शाश्वतीः समाः ८२ गृहे पुलिंगि
नामेव व्रतभ्रष्टोऽभिजायते एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ८३ तत्र तं बुद्धिसंयोगं
लभते पौर्वदेहिकं यतते च ततो भूयः संसिद्धौ गिरिनंदने ८४ क्रमेण कुरुते वीरशैवे वी
रमताश्रयं मतस्य मम विज्ञास्य कश्चारमेतस्य जन्मतत् ८५ स्वरूपे यत्नतः प्राप्य याति

किन्नोपदंमम पूर्वाभ्यासेनजेनैव हीयतेह्यवशोपिसः ८६ अनेकजन्मसंसिद्धिस्तत्तोया
तिशिवंपदं तपस्विभ्योधिकोलिंगीज्ञानीभ्योपिमतोधिकः ८७ कर्मिभ्यश्चापियोगिभ्यः
शिवलिंगीविशिष्यते उषस्सूर्योदयात्पूर्वमुहूर्ताद्वयमनेहसि ८८ पूजाकालःसविशेषः
शिवत्वप्राप्तिकारकः अथवानंतरंभानोरुदयाद्दर्यपोहि वै ८९ मध्याह्नेपितथासाम्यो रु
स्यानक्षत्रदर्शने निर्वृत्योर्बस्तिकिंपूजां जपस्तोत्रादिकेप्रिये ९० निर्गमेदटितुभैक्षं प्रण
म्यगुरुमादितः यदिभिक्षाटनेशास्तेतदाभिक्षाटनंचरेत् ९१ नकर्तव्यस्त्वनियमो सा
धनंज्ञानमेवहि पर्यटेल्लिंगनामेवभक्त्यानां शिवयोगिनां ९२ यावदिच्छन्गृहद्वारं प
कंवापक्षमेववा निबंधपादपंटोवापंटोवाजयघंटिका ९३ शंखश्च्यशृंगिनादोवा

९० दंडघंटोपिपर्यटन् रुद्राक्षाण्यंच्यमालाभिः कंथाकंबलसंयुतिनः ९४ विज्ञापयित्वा गृहिणः
कथाचित्सदुसंज्ञया भिक्षेत्पात्रपयल्लिंगी गुरुधर्ममनुस्मरन् ९५ गृहीत्वा गृहिणीवापि
नत्वा जंगममानयेत् शिवबुध्यार्चयित्वा तं संतृप्तं प्रेषयत्पुनः ९६ मध्यपक्वं समानीतं पक्वं
कृत्वार्पयेन्मम यदिस्यात्पक्वमानीतं मय्यार्पितं मम ९७ नचैकभुक्तनियमो नोपवा
सादिनोव्रतं त्रिकालमर्चयेल्लिंगं विहरेत यथासुखं ९८ विषयेंद्रियसंरोधं नैरंतर्येण या
वता यत्नेनयनते लिंगी नावल्लपुस्करं व्रजेत् ९९ यथैवगच्छन्मार्गेषु शीतवातातपादि
के विषयेत्लघुदेवेशि स्थपदं नाधिगच्छति १०० नस्त्रीषु नैवा नरेषु नाधर्मेष्वपिजन्मस ९०
नतिर्यगादिनीचेषु जायते वीरशैवगः १ वीरशैवमतस्थोयः पूजयेच्छिवरूपिणं निस्ता

रयत्तिदानां दशपूर्वान् दशापरान् २ यस्तिरस्कुरुते मूढ शिवलिङ्गिनमीश्वरि सकोटिकु
लसंयुक्तो रौरवे नरके वसेत् ३ नदेतत्कथितं देवि वीरशैवस्य लक्षणं आचारंच फलंचापि कि
भूयः श्रोतुमिच्छसि ४ इति श्री पारमेश्वरतंत्रे शिवाद्वैतसिद्धांते दीक्षाप्रकरणे अष्टमः पटलः ८

श्रीगुरुदत्त श्रीगुरुदत्त श्रीगुरुदत्त श्रीगुरुदत्त श्रीगुरुदत्त श्रीगुरुदत्त श्रीगुरुदत्त

८१ श्रीविनायकायनमः श्रीदेव्युवाच नमश्चैतन्यरूपाय नमः पंचमुखायते वदविस्तरतोदेव
वीरशैवस्यविक्रमं १ कथितानामदभेदास्ते लक्षणादिनिरूपिते वीरशैवमतस्यापि महिमाव
र्णितस्त्वया २ उक्ताधिकारीज्ञानेन वीरशैवमतंगतः यथोक्तफलमाप्नोति श्रुत्वावेदमया
खिलं ३ सहवासबलेनान्यो वासनावासितोपिवा स्वस्थः परवशोवापि क्रमेणव्युत्क्रमेण
वा ४ नशास्त्राचार्यशिक्षास्तेनज्ञानेनविवेकता हटाद्वाबुद्धितोवापि कार्यार्थीवाभयातुरः ५
अलब्धसम्यक्तत्वं नस्थैर्यंनापिवापलं वीरशैवमतंप्राप्य कांगतिंशिवगच्छति ६ अनावा
दधिकारस्य वीरशैवमतंव्रजेत् नकश्चिद्दुर्भयभाक्ः प्राप्यस्यागेनशंकर ७ ईश्वरउ० यथो
क्तस्ययथोक्तस्याः फलंचापिगतिर्गतिः किंत्वन्येषांप्रवक्ष्यामि महिमानंगतिंत्वयि ८ ८१

यधोंधावापिपंगुर्वामूकोवाबधिरोपिवा उन्मत्तोवापिसर्वज्ञोदरिद्रोवामहीपतिः ९ पुण्योवा
नपिपापीवा साधुर्वादुर्जनोपिवा यद्विमुक्षोप्यमुक्षोवा कासींप्राप्यभवेज्जनः १० प्रवेशमा
त्रेणशिवेपंचक्रोशात्मकेमपि अहमेवहितेसर्वेवीरशैवमनेतथा ११ प्रवेशमात्रेणशिवे
ममशैवमनेनरः सोहमेवनसंदेहः किमुवीरशिवोयदि १२ क्षुधितस्यापिनृपस्य शर्कराम
धुरायथा शानिनोज्ञानिनस्यापि वीरशैवंसुखप्रदं १३ मयेनास्तीतिविषये अनुरक्तोभवेद्य
दि संसक्तःस्वोचितनाचारः सपतेद्रौरवेचिरं १४ निगृहीतेंद्रियग्रामो नियुक्तध्यानतत्परः अ
नपेक्षःस्वतःप्राप्तेप्यात्मध्यानपरायणः १५ एकांतभक्तिरीशाने यत्सर्वत्रसमदीक्षणं अहंता
भावनारवंद्रु शांतिः प्राणिदयापरः १६ इत्यादिशासनोपेतः सत्क्रमात्क्रमतोत्वहं स्थित

स्यदैवयोगेन यघबांधजनुष्मतो १७ कश्चिद्देवभवेश्चित्तं निशामय महेश्वरि यदि पीडापरो
मूढः सपतेन्नात्र संशयः १८ यथाकथंचिद्भो वीर शैवः संचितपुण्यतः यदाकदावाभवति
तदासोहं न संशयः १९ विनाममानुग्रहेण प्रवेशो लभ्यते नृभिः नशैवमात्रे देवेशि वीरशैवमते
नकिं २० तत्सर्वकर्मविलयः सर्वपुण्यफलोदयः वीरशैवव्रतं तेन लभ्यते देवि नान्यथा २१
अ[illegible]नाथ्यादिषु भेदेषु यत्रयत्रस्थले द्रुते रूपयाममकल्याणि वीरशैवेन भुध्यति २२ वीर
शैवमतं स्याप्य यो बुध्या विषयातुरः ध्यानयोनिशातं गत्वा यांति कौमुकिजापते २३ वीरशैवम
तं प्राप्य यः कुर्यात्प्राणहिंसनं कर्मणा मनसा वाच्या सवसेद्रौरवे चिरं २४ वीरशैवव्रतं प्राप्य यः
कुर्यात्परपीडनं भोगार्थं संग्रहं मद्यं मांसं स्त्रीं च कलंजनं २५ स्वर्णस्तेयं दिवा निद्रां सर्वदैका

नभोजने प्राङ्गनैः सह संगं च संगत्यागे व लिंगिनां २६ सकोटिजन्मस्कन्धान श्यांग लोमु
विज्ञायते वाहनंजनसंगं च [illegible] स्त्रीकथालोल्यमेकच २७ अनाधारेन
२ थालस्यं वीरशैवो न कारयेत् यः पश्यत्यंधवद्रूपं शब्दविद्धबधिरोपमः २८ काष्ठवद्दृष्टदेहो यो
वीरशैवः स उच्यते न बुध्या चिंतयेदर्थे वीरशैवव्रतेसह तु २९ संप्राप्य दुःखवाराशिं शने
र्मुक्तो भवेद्ध्रुवं न यस्यानीश्वरे चित्तं यस्य चक्षुर्न दूरगं ३० न प्राप्तिपीडुनपरो वीरशैवः स
उच्यते मर्मविज्ञायते यस्य यो बुध्या विषयातुरः ३१ नस्य नास्त्येव नास्त्येव मत्पदप्राप्तिरीश्व
रि लक्ष्ये निधोदरिद्रस्य गोपनं तस्य जीवनं ३२ आस्याभक्तिश्च नास्त्येव वीरशैवस्तथा य दि
तिष्ठद्रूपमार्गेण सोना यासेन निर्वृतिं ३३ यानि महत्पयानोचे दुःखनायाति निर्ईतिं नष्
टाप्रविशेः वीर शैवव्रतमहांबुधौ ३४ धीमान् विनासाधने न औयास सुखकामनः

५३ हटाच्चस्रविरोद्देवाद समनस्ततोभवेत् ३५ पद्यस्थिरेंद्रियग्रामा सपत्तेन्नात्रसंशयः यथामतेषुस
वैषु तुरीयत्वेनशास्यते सन्यासस्यान्यधर्मस्य वीरशैवमतस्यच ३८ स्वद्गारोहंदिवानिद्रां तांबूलाभ्यं
गविग्रहान् सुवर्णमुकुबासम्बा प्यलिंगीवर्जयेद्यतिः ३९ येकत्रवासमेकान्ने रसवर्जनसंगमे स
माजस्तुसर्वलोके लिंगीवर्जयेदिति ३९ द्विरन्नमेच्छिकंक्षौरं लोहपात्रेषुभोजनं तथैच्छिकजल
स्नानं नलिंगीवर्जयेद्यतिः ४० ग्रस्तयोरस्तगतयो राहुणा शशिसूर्ययोः शक्तोभैक्ष्मंमहोरात्रंमलिं
गीवर्जयेद्यतिः ४१ अमृत्तिकादिनियममस्पृष्ट्वालावगाहनं अपूर्वापरकर्मांग मलिंगीवर्जयेद्य
तिः ४२ उपानहमनद्वाहंस्वयंपाकेसुगंधिके अकरक्षालनेभुक्त्वा चालिंगीवर्जयेद्यतिः ४३ पु
त्रिण्या वापिगर्भिण्या सुतकान्नमसूयया भक्त्यापिदत्तं स्पृष्ट्वापि स्वलिंगी वर्जयेद्यतिः ४४ ५३

अलिंगिनो यतेर्देवि बहुक्लेशो भवेत्सदा निवृत्तिवीरशैवस्य लिंगिनो लिंगतः सुखं ४५ नकायक्लेशसह
नं नव्रतादी उपोषणं नद्वंद्वसहनं भद्रे वीरशैवस्य लिंगिनः ४६ बंधानुरस्य तु सदा नास्त्येवमसरूपिता
सर्वसाधारणमिदं मनायासो विशिष्यते ४७ अस्नात्वा वापि भुक्त्वा वा स्वइच्छायामुपविश्य वा पूजायाम
मलिंगस्य मामेवेति नसंशयः ४८ तिर्यगादिषु योनिषु भूत्वा मृत्वा सहस्रशः अनुष्ठायाहतादीनि
तत्र संचितपुण्यतः ४९ भवेनूमत्स्वरूपया देवि एकस्मिनूजन्मनि द्विजः अधीत्य वेदान्वेदांते लब्ध्वा
तत्वं गुरोर्मुखात् ५० संत्यक्तविषयस्नेहः सर्वभूतदयापरः सन्यस्य संश्रयो योगं येनमामेव याति
सः ५१ निष्पन्नयोगश्चरमे भवे लिंगी जनेष्वथ तत्पक्वफलसारांश वीरशैवमतं श्रयेत् ५२ ता
वदुन्नतमागत्य पदं शैवमतं मम तत्र सर्वोन्नतं वीर शैवव्रतमनुत्तमं ५३ वीरशैवव्रतवतो व्यवधा

नेममाप्यिच एतावदेवदेहांतेश्चैकायवनिकापदा ५४ शाक्नोतिहेवपः सोढुंप्राक्शारीरविमोक्षणात्
कामक्रोधोद्भवंवेगंसयातिलघुमांछिवे ५५ यश्चशाक्तः शिवेसोढुं वीरशैवमतेगतः निग्रहीकरणा
नांतु सरुच्छ्रेणोपशाम्यति ५६ दैवोपलब्धसुखभुक् शिवपूजापरायणः वीरशैवपदंप्राप्यसुखेनो
पेतिनिर्वृतिं ५७ त्रिकालंभस्मनास्नानं शक्तितोलिंगपूजनं भैक्ष्यंचशिवभक्तेषु वीरशैवस्यलक्षणं ५८
पात्रमेकंतुभैक्ष्यायाः कंथैकारूष्णकंबलः दंडोध्वनिः शिवेभक्तिः वीरशैवस्यलक्षणं ५९ चूलि
कापात्रदंडेच सकंथारूष्णकंबलः मुद्रेघावीरशैवस्य वीरशैवस्यलक्षणं ६० मौनमेकांतवासश्च
मस्तास्त्रस्यावलोकनं विरक्तिर्विषयाग्रामे वीरशैवस्यलक्षणं ६३ शांतिर्निष्ठाभूतदयाचित्तवृत्ति
निरोधनं सर्वत्रेश्वरतादात्म्यंवीरशैवस्यलक्षणं ६४ नैवरक्षंति विषया नभोगानचबांधवा

नैवसंपन्नदारिद्र्यंनिष्टैकासनिशांकरे ६५ गुरुशुश्रूषणंशास्त्रचिंतनंनंतदनुष्ठुभिः शांतिरेकांतवा
साभ्य भक्तिर्दैविशिवेमपि ६६ पूजनेसर्वदालिंगे वीरशैवोपसर्पणं मत्पदप्राप्तयेचैतत्सोपानपथ
मुच्यते ६७ अरण्येसंतिपात्राणि नद्यांस्वादूदकानि च संतिहस्तौचपादौच मल्लिंगंनिरूपद्रवं ६८
नोद्यमोनास्यसेवावा नायासोनोर्थसंक्षयः आसाध्यस्कस्वमीशांमां धीमानेतिशिवंपदं ६९ लब्ध्वापि
मूढः पुण्येनवीरशैवमतंमम नसाधयेत्स्कस्वेयस्तु कोन्यतस्मादचेतनः ७० वीरशैवमतंप्राप्य योन्य
थासुखमिच्छति ससेत्यज्यगुडंमूढो केक्षीहेत्यर्णमीश्वरि ७१ वीरशैवमतस्थोय आकांक्षेत्क्षाणिकंस्क
खं आरुह्यपट्टभद्रेभं प्रविशोऽज्जलनिर्गमं ७२ प्राप्यवीरमतंस्यक्त्वान्यथेच्छेच्चः परंमम सगृही
त्वाशुनःपुच्छं तर्तुमिच्छतिसागरं ७३ पुण्येकोऽभ्यमाश्रित्य वीरशैवमतंमम योवंध्येदिवसंकुर्या

५५ ज्ञान्यस्मादस्य चेतनः ७४ करस्थिते ज्वलद्दीपे वीरशैवाभिधे सति कुपथ्येन कूपे पतन्तु सौधो न गतलोच
नः ७५ वीरशैवव्रतस्वच्छ वज्रनाममधिष्ठितः सुखेतरं भवांभोधिं भक्तिनाविकचोदितः ७६ प्राप्या
पि तादृशीं नाव मालस्येनैव वायुना प्रतिकूलेन दुःखाब्धौ पात्यते निहतः स हि ७७ अभक्तेनाविवेके
ना दृढ वैराग्य गौरवात् अधैर्यस्तं भिनानौका पातयेद्भग्नसाधनः ७८ कामलोभादि सहिता श्चोरा
लि विषया यतः ज्ञानरत्नापहाराय यतंते सततं शिवे ७९ अशक्तः सहनो मुढो द्वंद्वं दुःखस्य लक्षणे
व चिरं विसेते क्लेशं मधुमग्नेव मक्षिका ८० अवर्जनीयो प्राप्यापि भोक्तुं प्राप्यापि दुःखदः यत्र चोभय
थाप्यनु र्विषयः सुखनाशकः ८१ तद्धात्वा मलं स्पृष्ट्वा विषयेक्षालयेत्सुधीः ज्ञानेन वीरशैवेन व्रतेनै
व शुचिर्भवेत् ८२ यथैधांसि समिद्धोग्निर्भस्मसात्कुरुते शिवे तथैव निर्दहेद्बंधं वीरशैवव्रतानलः ८३ ५५

तु

व

वीर शैवव्रतम हाव्रजपंजरमध्यगः तिष्ठेद्नामयन्नित्यंसुखंहंसवद्वाद्विजे ८४ तिष्ठेद्नादिभेदेषु यदि
ष्वविषयेष्वय भुंजन्समुचितान्भोगान् पूजयेल्लिंगमुक्तवत् ८५ अर्चयेदतिथीन्भक्त्या साधयेत्कर्मयो
हितं यथादिस्वार्चयेल्लिंग मनुस्याश्रवणि भवेत् ८६ विशेदथमहाशैवं मननाद्युक्तसाधनः योगयुक्ता
धिकारी सन् योगशैवमतं भजेत् ८७ ईषणत्रयनिर्मुक्तः स्यक्तरागो जितेंद्रियः योग [illegible]
[illegible] शैवमतेप्राप्याप्यधिकारी यमीश्वरि ८८ शालागुरुमुखाछास्त्रे धृतकाषाय दंडकः प्रव्रजे
द्गृहमुत्सृज्य शिखीमुंड्यपिवाजटी ८९ योगशैवमतेवीरं भक्त्यानत्वासमाश्रयेत् ततोधिकारं संप्राप्य व्र
तेपाशुपतेश्रयेत् ९० तदैवज्ञानशैवाख्यं ततोवीरव्रतंचरेत् कथितोयोवधूताख्यो वीरशैवः सरेश्वरि ९१
नातोधिकेमतेकिंचिन्नास्तिमतपरंस्फुटं वीरशैवव्रतंनाम नावधूतव्रतात्परं ९२ शक्यतेसाधितुं

प्राप्य ततएवंव्रतंचरेत् नैव शुद्धिर्नचाशुद्धि र्नैच बंधकवंधता ९३ नपूज्यपूजक विधि र्नशिष्योनगुरुः
शिवे नमाता नपिता भार्या नचांगालो नभूस्तरः ९४ नगोर्नशुनको हस्ति गर्दभोवापिभेदतः नोत्तमंमध्य
मंनीचं नन्यूनमधिकंसमं ९५ वीरशैवावधूतस्य सममेवाखिलंशिवे अखंडसच्चिदानंद देहदर्शांतवर्जि
तं ९६ अप्रतर्क्यमनिर्देश्य मव्ययंद्वैतवर्जितं निर्लेपमखिलाधार मसंगंसर्वकारणं ९७ सर्वदृक्स
र्वभुक्सर्वं मसर्वंसर्वतो मुखं तदेकमच्युतप्रख्य मप्रज्ञंप्रज्ञयोदितं ९८ ज्ञान ज्ञेयंज्ञानगम्यं ब्रह्मशैवपदं
मम तन्मयंभावयत्सर्वंजगदेतच्चराचरं ९९ अनंतसागराकूट सुखनौगर्भगः सुखं पुनरावृत्तिरहि
तमनामयमविक्रियं १०० शैवंममपदंप्राप्य शिवेसोहमलंशिवः नक्रमोनविधिर्दोष निषेधौभाविनात्मनः १
वीरशैवावधूतस्य सोहमेवशिवस्वयं नपुण्यंनचवैपापं नाध्यमागतिरंतमा २ स्वयमेवाखिलंदेवि

वीरशैवः शिवोप्यहं इति ते कथितं देवि संक्षेपेण मया क्वचित् ३ महात्म्यं वीरशैवस्य किं भूयः श्रोतुमि
च्छसि ४ इति श्री पारमेश्वर तंत्रे शिवाद्वैतसिद्धांते नवमः पटलः ९ श्रीराम जयराम जेजे राम ॥ श्रीराम



श्री अनंताय नमः श्री गुरुभ्यो नमः श्रीदेव्युवाच योगिहृत्पद्मवासाय योगिवेद्यस्वरूपिणे ब्रह्मानंदप्र
काशाय शिवाय शिवते नमः १ अनादिशैवनिष्ठस्य सोत्काचारो विधिः सदा संकल्पोद्दिश्य च फलं शक्त्या
जंगमपूजनं २ नित्यं नैमित्तिकं काम्यं यथोक्तं गुरुशास्त्रतः आचारे त्रिविधे कर्म यथेष्टं सुखभुग्भवेत् ३
आदिशैवमतस्थस्य यावन्नित्यं तथाचरेत् यदि शक्त्याचरेदन्ये नित्यबुध्या तथाचरेत् ४ अनुशैव

५८ मतस्थश्चेन्नित्यमेवं समाचरेत् त्यक्त्वा कर्मफलासंगं काम्यनैमित्तिकानि च ५ यथाशक्त्याचरेन्नित्यं स
क्लेशकोऽस्मरेच्छिवं सर्वलिंगमयं ध्याये महाशैवव्रतीजगत् ६ इत्येन ह्यधिकारोऽपि सोपानवल्लिरी
रिता एतादृशाधिकारी सन्योगशैवं व्रजेदिति ७ निरूपितं महादेव भगवन् भवता प्रभो स्वरूपं योगशै
वस्य ज्ञातुमिच्छास्ति मे हृदि ८ यज्ज्ञानं ज्ञानशैवं तन्न क्रमे दीक्षा न योगयोः याभ्यां समन्वितो वीरशै
वव्रतफलं लभेत् ९ एतत्सर्वं सविस्तारं ब्रूहि शंकर तत्वतः वदतां प्रियशिष्यो हे प्रियोऽसि त्वं गुरुर्मम १०
ईश्वर उ० शृणु देवि प्रवक्ष्यामि रहस्यमिदमुत्तमं प्रत्यक्षागमं धर्म्यं सुसुखं कर्तुमव्ययं ११ नेदं पूर्वं मया
कापि कथितं त्विदमद्भुतं त्वयि स्नेहेन वक्ष्यामि श्रुत्वा धारय गोपय १२ शैवभेदस्य यच्चोग पूर्वं तं योग
पानवत् स चापि द्विविधो योगः साकारश्च निराकृतिः १३ निराकृतिर्निराकारो ध्यानं ध्येयविव ५८

र्जितः ज्ञानतोपज्ञानभेदः प्रत्ययत्र यवर्जितः १४ नतत्रचंद्रमाः सूर्यो नक्षत्राणि दिशोनलः विद्युद्वातो
बुधरणि मेरुब्रह्माण्डसंज्ञकाः १५ यदखंडं परंज्ञानं यदेकं स्वच्छमव्ययं यदव्यक्तं मनोतीतं तदेकं ब्रह्म केवलं
तद्भावनादिकारीयो ज्ञानयोगान्वितः शिवे वीरशैवाग्रधूर्तोपि सएव कथितः शिवे १६ बहिर्गतेपि तद्विते
स्वात्माभावे विनाक्कचित् नतत्तादात्म्यात्मभावेन ज्ञानशैवव्रती भवेत् १७ न्यूनाधिकारिणस्तत्र सर्वैः
म क्यज्ञानकर्मणि विविक्तदेशमाश्रित्य ध्यानमेवसमभ्यसेत् १८ शुचौदेशे प्रतिष्ठाप्य स्थिरमासनमात्मनः
नरक्षवेवामार्गवा चर्मास्तिर्यतथोपरि १९ आस्तीर्य कंबलं रुच्यं वस्त्रं काषायमास्तरेत् अभ्यसेदासनं
चारी उपविश्य यथासुखं २० आसनेतु जितेदेवि जितो देहोपि वस्यतः पार्ष्णिभ्यां वा [illegible] द्वयोर्भूत्वा नासाग्र
गतलोचनः २१ आतिष्ठेत्स्थाणुवत्स्वस्थो यथा दीपो निवातगः समं कायशिरोग्रीवं धारयन्नचलं

स्थिरं २२ हृत्पुंडरीकेनाभ्यंवा स्वाधिष्टानेपिमूलके विशुद्धौ चापिचाज्ञायां सहस्त्रारेपिवाशिवे २३ ब्रह्म
रंध्रेशिवाग्रेवा द्वादशांते चिदात्मनि एतदन्यतमस्थाने ध्यायेन्मां परमेश्वरं २४ दिव्यसिंहासनं तत्र कर्णिको
तु मध्यभागतः मंडपंचतुस्तंभं विनानावल्लिशोभितं २५ भावयित्वातुपरितः कल्पवृक्षवनावलिं परितस्त
स्यसंभाव्य भावयेत्क्षीरसागरं २६ द्वीपंमणिमयंध्यायेत् तन्मध्यमणिमंडपं मुक्ताप्रवालशोभाढ्यं चतुर्द्वार
समन्वितं २८ सर्वतोदीपिकारेखा तोरणाद्यैरलंकृतं सर्वशृंगाररसैः पूर्णमनसैवविभावयेत् २९ मध्येत
न्मयेपीठे पद्ममष्टदलंलिखेत् वृत्तंकृत्वास्त्रवृत्ताते भावयेद्भूपुरत्रयं ३० षट्कोणमध्येविलिखे त्त्रिको
णंतस्यमध्यतः केसरान्विलिखेदष्ट पत्रमध्येतुषोडश ३१ बिंदूपरिमहादेवि दिव्यसिंहासनेस्मरेत् न
वरत्नमयंरम्यं सूर्यकोटिसमप्रभं ३२ नवसोपानसंयुक्तं सर्वदेवमयेशिवे सर्वशक्तिमयंसर्व मंत्रयंत्रमयंपरं ३३

तत्र मोसस्फ़ुखासीनमुमयासहितं शिवं चतुर्भुजमुदारांगं चंद्रशेखरमव्ययं ३४ भस्मोद्धूलितसर्वांगं
ज नागाभरणभूषितं कुठारेणाभयवरं पाणिपंकेशिश्वरं ३५ मंदस्मितं त्रिनयनमीशा॰ नं कृत्तिवाससं प्र
सन्नवदनांभोजं सर्वालंकारशोभितं ३६ एवं ध्यायेच्छिरं योग्यावरणानितंतोयजेत् सर्वत्र मूलमंत्रेण
सहस्रारेणमंत्रवित् ३७ पुरतो नंदिनं ध्याये दक्षिणे गणनायकं तत्पश्चिमे महावीर भद्रमुत्तरतो गुहं ३८
चतुर्दिक्षु त्रिकोणस्य प्रादक्षिण्येन शांकरि यजेदारभ्य च स्याग्रे नंद्यादीनां चतुष्टयं ३९ अथषट्कोणको
णेषु प्रादक्षिण्येन भावयेत् षडामोदादिकान्षट्सु वाहानायुधसंयुतान् ४० आमोदं च प्रमोदं च स्फुमु
खं दुर्मुखं तथा अविघ्नं विघ्नकर्तारं कोणाग्रेष्वंगावट्टके ४१ भवं पशुपतिं रुद्रं शिवं शर्वं त्रियंबकं त्रिने
त्रं पंचवदनं पत्रेषष्ठ सुपूजयेत् ४२ वृषध्वजं वृषारूढं जटिलं चंद्रशेखरं कपर्दिनं कालकंठं पिना

जनेष्वपि ६२ स्वमनेविमनेमूढो पराध्यर्युपक र्तरि सर्वत्रभावयेदेकं वीरशैवमनेशिवे ६३ यःपूजये
न्मामीशानिपुष्पैरेनैरन्तेद्विनः सर्वदासर्वदाशंभु वीरशैवःसउच्यते ६४ रागद्वेषविमुक्तानोलिंगिनांवी
रशैविनो अभितःशिवकैवल्यं करस्थंविदितात्मनो ६५ अवधूतस्यसन्यासी योगीपाशुपतःशिवः
लिंगीवीरोवीरशैवो महामाहेश्वरोयतिः ६६ पर्यायनामान्येतानि वीरशैवस्यलिंगिनः नान्यदस्तिनत
स्तस्य विनानादात्म्यभावनां ६७ नागार्द्रकुरुतेक्वापि नद्वेषंनान्यपीडनं यदिच्छेन्ममसायुज्यं वीरशैवोमहे
श्वरि ६८ नवीरशैवादधिकफलंदमतमस्तिहि यच्युस्थस्तितदाकश्चिदपि। कोमत्परःशिवे ६९ यःकु
र्याद्वीरशैवस्थःपीडनंप्राणिनांभुवि सजीवन्नेवचांडालो मृतोरौरकमश्नुते ७१ शमोदमस्तितिक्षोप
रतिःश्रद्धासमाधयः षडंगानिमहादेवि वीरशैवस्यलिंगिनः ७२ यच्चकेनापिचैतेनषोविहीनोहि

नएवसः अंगलोपेभवेद्यांगी तेनाधोनिपतेध्रुवं ७३ यथामनुष्यःसर्वांगसयुक्तोंगीनिकथ्यते यथ
न्यथाभवेद्यंगी तथैवायंनसंशयः ७४ नपुष्पाहरणायासो नतद्वारान्यपीडनं भावेनैवपरंकर्मद
येकावीरशैविनः ७५ दयाभूतेषुतस्यैकंसाधनंप्राप्तयेमम तथैकंनरकंप्राप्तोलिंगिनःपरपीडनं ७६
जगत्सर्वमहंदेवि यच्चकिंचिच्चराचरं मच्छरीरमिदं विध्दि नामरूपक्रियात्मकं ७७ तद्भूतांममयोभक्तः
कुर्याद्द्वेषमपिक्वचित् अमदं वीनसंदेहो तन्मोसर्वत्रभावयेत् ७८ स्वशरीरेयथादेविसापादतलं
मस्तके तथैवैकत्वमध्यासःसर्वत्रैवविभावयेत् ७९ वीरशैवमतस्थस्ययावतीभेदभावना भूते
षुभावनास्तीव मत्प्राप्तिस्तस्यसुंदरि ८० किमत्रबहुनात्रशृणुयोर्थ्वेविनिश्चितं वक्तव्येग्रंथ
विस्तारैःसर्वसिध्दांतमीश्वरि ८१ हृदियस्यनतोलिंगंमनोमयिमनुर्मम शैवःपंचाक्षरःपुण्यः

६१

सज्जिह्वाय महेश्वरि ८२ तत्रवक्ष्ये गिरिसुते सारात्सारतरं तव गोपनीयं प्रयत्नेन वदाम्यकायया गिरे ८३

जपेत्पंचाक्षरं शैवं भुक्तिमुक्तिफलप्रदं सर्वधर्मान्परित्यज्य शैवं पंचाक्षरं जपेत् ८४ स्वस्थः परवशो वापि

क्षुतप्रस्खलनादिषु व्याजेनाखिलभेदेन शैवं पंचाक्षरं जपेत् ८६ [illegible]

[illegible] शान्तो वा कुपितो वापि शुद्धो वाशुद्ध एव वा विधिना विधिना वापि शैवं पंचाक्षरं जपेत्

८७ सर्ववेदेषु सर्वत्र सर्वकालेषु सर्वदाः सर्व[illegible]दा सर्वदा देवि शैवं पंचाक्षरं जपेत् ८८ न कैलास

समो लोको न देवं शंकरात्परं न वीरशैवात्परमतं नास्ति मुक्तिपरं स्मृतं ८९ नास्ति ज्ञानात्परं मित्रं न

मन्त्रः साधनं परं न शैवादधिको मर्त्यो मन्त्रः पंचाक्षरः परः ९० स्मृत्वा स्मरणरूपेण स्तोत्ररू

पेण संस्तुवेत् प्रजपेन्मन्त्ररूपेण शैवं पंचाक्षरं मनुं ९१ यदि त्वं मम सायुज्यमनायासेन सुंदरी

जिघ्रन्भुंजन्स्वपन्गच्छन्श्वा
सन्नापि हसन्नपि उपविश्यन्प्रा
बुध्यन्वा शैवं पंचाक्षरं जपेत् ८५

६१

नविस्मरेत्सदा मंत्रं ममपंचाक्षरं परं २२ आलस्येनापि शाठ्येन परिहासेन मायया स्मरेन्नवा स्वभावेन
शैवं पंचाक्षरं परं २३ स्वप्नेपि वा स्मृते मंत्रे सुखे दुःखे रणादिषु सकृत्पंचाक्षरे वापि सोहमेव नसंशयः २४
किंपुनर्भक्तितो यस्तु जपेन्मंत्रे त्तमोत्तमं शैवपंचाक्षरं दिव्यं भुक्तिमुक्तिफलप्रदं २५ स्मरणात्कीर्तना
द्ध्यानाज्जपादपि मुनेरपि मननात्पूजनाद्वापि नृ भोगः स्वर्गापवर्गदं २६ शिवपंचाक्षरं जप्त्वा लिंग
पूजां करोति यः सोपि मानुषदेहस्थः शिव एव नसंशयः २७ यस्तु लिंगार्चनं कृत्वा जपेत्पंचाक्षरं मनुं
दिने दिने सहस्रं तु सोहमेव यथा ह्यहं २८ पंचाक्षरस्य माहात्म्यं मया वक्तुं न शक्यते ब्रह्महत्यादिभिः पापै
र्मुच्यते नात्र संशयः २९ प्रोक्तं मया महादेवि शिवयोगस्य लक्षणं तद्ध्यानं तद्विधानं च किंभूयः श्रोतुमि
च्छसि ३० इति श्री पारमेश्वरतंत्रे शिवाद्वैतविधाने दीक्षाप्रकरणे शिवयोगविधाननिरूपणं नाम दशमः पटलः १०

६२

श्रीगणपतयेनमः श्रीरामचंद्र श्रीगुरुभ्यो श्रीदेव्युवाच परमेश्वरसर्वज्ञ शुद्धज्ञानमहोदधे पं
चाक्षरस्यमाहात्म्यं श्रोतुमिच्छामिशंकर १ पंचाक्षरविधानंच जपध्यानादिषुप्रभो कथयस्वा
भिधेयंचतेनमंत्रेणसूक्ष्मशः २ देवानाप्यत्र्च विहंदस्तन्मेवदमहेश्वर ३ ईश्वर० पंचाक्षरस्य
माहात्म्यं वर्षकोटिशतैरपि नशक्यंविस्तराद्वक्तुं तस्मात्संक्षेपतः शृणु ४ वेदेचवेदशीर्षेवाप्यु
भयत्रषडक्षरः मंत्रस्थितः सदामुख्यालोकेपंचाक्षरः स्मृतः ५ रहोंनमःशिवायेति मंत्रेणानेन
नास्तिक्षयः हंसो लभ्यः सदासर्वैः परमेशप्रभावतः ६ सर्वमंत्राधिकश्चाय मोंकाराद्यःषड
क्षरः सर्वेषांशिवभक्तानांभ्यो अशेषार्थप्रसादकः ७ तदल्पवेदसाराख्यं भुक्तिदंचविमुक्ति
दं आज्ञासिद्धमसंदिग्धं वाक्यमेतच्छिवात्मकं ८ नानास्ति छिद्रयुतं दिव्यं लोकविजोषुरंजनं

स्फनिश्चितार्थगंभीरं वाक्यं तत्पारमेश्वरं ९ मंत्रस्सुखमुखोच्चार्य श्चाशेषार्थप्रसादकः तदल्पंवे
दसाराख्यं भुक्तिदंचविमुक्तिदं १० तद्बीजंसर्वविद्यानां मंत्रमाद्यंषडक्षरं अतिसूक्ष्मंमहार्थंच
ज्ञेयंतद्वटबीजवत् ११ अहंगुणत्रयातीतः सर्वज्ञः सर्वकृत्प्रभुः ॐमित्येकाक्षरेमंत्रेस्थितः
सर्वगतोस्म्यहं १२ प्रणवोप्यधिकस्तस्य शिवस्यपरमात्मनः ग्रामिकाभक्तिरुद्दिष्टा प्रणवाभ्या
ससंभवा १३ शिवरुद्रादिशब्दानां प्रणवादिपरःस्मृतः शंभोःप्रणववाच्यस्यभावनातज्जपाद
पि १४ यासिद्धिश्चपराप्राप्याभवत्येवनसंशयः तस्मादेकाक्षरंदेवमाहुरागमवादिनः १५ वाच्य
वाचकयोरैक्यं मन्यमाना मनस्विनः ज्ञायतेयोगिभिर्ध्यानेबोधानंदाव्ययाद्वयः १६ ईशानाद्या
निसूक्ष्माणि ब्रह्माण्येकाक्षराणितु मंत्रोनमःशिवायेति संस्थितानि यथाक्रमं १७ मंत्राक्षर

तः सूक्ष्मः पंचब्रह्मतनुः शिवः वाच्यवाचकभावेन स्थितः साक्षात्स्वभावतः १८ वाच्यः शिवः प्रमेय
त्वा न्मंत्रस्तद्वाचकः स्मृतः वाच्यवाचकभावोयमनादिः संस्थितस्तयोः १९ तत्राधिपेन मंत्राणां स
र्वज्ञेन मया शिवे प्रणीतममलं वाक्यं नतेन सदृशं भवेत् २० सांगानि वेदशास्त्राणि संस्थितानि षडु
क्षरे नतेन सदृशं तस्मान्मंत्रमस्त्यपरं क्वचित् २१ सप्तकोटिमहामंत्रै रूपमंत्रैरनेकशः मंत्रः षडा
क्षरो भिन्नः सूत्रं वृत्यात्मनो यथा २२ शिवज्ञानानि यावंति विद्यास्थानानि यानि च षडक्षरस्य सू
त्रस्य तानि भाष्यं समासतः २३ किं तस्य बहुभिर्मंत्रैः शास्त्रैर्वा बहुविस्तरैः यस्यो नमः शिवायेति
मंत्रोयं हृदि संस्थितः २४ तेनाधीतं श्रुतं देवि तेन सर्वमनुष्ठितं यतो नमः शिवायेति मंत्राभ्या
सः स्थिरीकृतः २५ नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयं जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितं २६

६४ अंत्यजोवाधमोवापि मूर्खोवापंडितोपिवा पंचाक्षरजपेनिष्ठो मुच्यतेपाशबंधनात् २७ तस्मा
त्षडक्षरोमंत्रः सर्वसिद्धिप्रदायकः षडक्षरमयंदेवं मांतुयोजपतेभुवि २८ तस्यमुक्तिःकर
स्थास्याद्वीरशैवजरस्यच शैवाश्रमवतांपुंसां लिंगिनांवीरशैविनां २९ ममपंचाक्षरोमंत्रकल्प
वृक्षोधरात्मजे अस्याःपरमविद्यायाः स्वरूपमतिशोभने ३० शृणुत्वंकथयिष्यामिगुह्यंतत्स
पनाशने आदौनमःप्रयोक्तव्यःशिवायेतिततःपरं ३१ एषापंचाक्षरीविद्याप्रणवाद्याषडक्षरी
सप्ताद्वीतस्यसर्वस्यबीजभूतासमाहिता ३२ सर्वसस्याशयासिद्धा नत्स्वरूपार्थवाचकी नमस्वामी
करप्रख्या पीनोन्नतपयोधरा ३३ चतुर्भुजात्रिनयनाबालेंदुकृतशेखरा पद्मोत्पलधरासौम्या
वरदाभयपाणिका ३४ सर्वलक्षणसंपूर्णा सर्वाभरणभूषिता सितपद्मासमासीना नीलकुं ६४

तल मूर्धजा ३५ अस्याः पंचविधा वर्णाः प्रस्फुरद्रश्मिमंडलाः स्वस्वरूपं हि देवेशि मत्स्वरूपं नमः
स्वयं ३६ पीतः कृष्णास्तथा धूम्रः स्वर्णगौररक्तश्च पृथक्प्रयोऽस्याप्यसेते बिंदुनादसमन्विताः ३७
अर्धचंद्राकृतिर्बिंदु र्नादो दीपशिखाकृतिः बीजं द्वितीयं बीजेषु मंत्रस्यास्य वरानने ३८ दीर्घपूर्वं
तुरीयंस्या त्पंचमे शक्तिमादिशेत् वामदेवो नाम ऋषिः पंक्तिश्छंद उदाहृतः ३९ देवता शिवः
वास्य मनोगिरिस्कन्नेस्म्यहं गोतमोऽत्रिर्महादेवि विश्वामित्रस्तथांगिराः ४० भारद्वाजश्च वर्णा
नां ऋषयः क्रमशाः स्मृताः गायत्र्युष्णिगनुष्टुप्च छंदांसि बृहती विराट् ४१ शिवो रुद्रो महा
देवः ईश्वरः परमेश्वरः तेषामधीशा वर्णानां क्रमेणैते शिवादयः ४२ शिवस्य पंचवक्त्राणि
तेषां स्थानान्यनुक्रमात् पूर्वादिचोर्ध्वपर्यंतं नकारादि यथाक्रमं ४३ उदात्तः प्रथमो वर्णो

द्वितीयं च चतुर्थकः पंचमः स्वरितस्थैव मध्यमो निगदः शिवे ४४ मूलं विद्या शिवः शैवं सूत्रं पं
चाक्षरं तथा षडक्षरं च तस्याहुः नामानि मुनयो मनोः ४५ हृदयं मूलविद्यायां नकारः शंकरः
शिरः शिखा मकारः कवचं शिकारो वा कं पदत्रयं ४६ यकारोस्त्रं नमः स्वाहा वषड्वौषड्हुंफ
डित्यपि षड्विर्वर्णैः षडंगानि कुर्यान्मंत्रस्य पार्वति ४७ मंत्रवर्णादिकान्यासे तत्त्वमूर्तिर्यथा
क्रमं तर्जनी मध्यमोरल्या नामिकांगुष्ठके पुनः ४८ तास्तुस्तत्पुरुषाघोर सद्योवामस्य सं
ज्ञकाः वक्त्रहृत्पादगुह्येषु निजमूर्धनि ना पुनः ४९ प्रागाद्यं वरुणोदीच्या मध्यचक्रेषु
पंचसु मंत्रप्राणि न्यसेत् पश्चात् जातियुक्तानि षट् क्रमात् ५० कुर्वीत गोलकं न्यासं रक्ष्या
यै तदनंतरं हृदि वक्त्रांसयोरूर्वोः कंठे नाभौ द्विपार्श्वयोः ५१ पृष्ठे हृदि तनो मूर्ध्नि वदने नै

से

त्रयोर्न्यसेत् दोष्णः संधिषु साग्रेषु विन्यसेत्तदनंतरं ५२ शिरो वदन हृत्कुक्षि सोरुपाद द्वये शिवे
हृदि वक्त्रो बुजेष्टंके मृगाभयवरेष्टदा ५३ वक्त्रांसहृत्स्वपादोरुजठरेषु क्रमान्न्यसेत् मूलमंत्रस्य
मंत्रार्णान् यथावद्देवि विन्यसेत् ५४ मूर्ध्नि पालोदरांसेषु हृदये तान् पुनर्न्यसेत् पश्चादनेन मं
त्रेण कुर्वीत व्यापकं सुधीः ५५ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने चतुर्मूर्ति वपुः
छाया भासितांगाय शंभवे ५६ एवं न्यस्तशरीरोसौ चिंतयेन्मां महेश्वरि ५६ अथ ध्यानं ॥ ध्या
येन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं
प्रसन्नं पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभय
हरं पंचवक्त्रं त्रिनेत्रं ५७ एवं ध्यायेन्महादेवि प्रसन्नविमलाशयः देव्यश्च मूलमंत्रोयं

६६ किंचिद्दूरं समन्वयात् ५८ तत्रास्यपंचमेवर्णो द्वादशस्वरभूषितः तस्मादनेनमंत्रेण मनोवाक्काय
भेदतः ५९ आवयोरर्चनं कार्यंजपहोमादिकंप्रिये यथाश्रद्धं यथाप्राप्तं यथाकालं यथास्मृतिः ६०
यथाशक्तिस्तुसंपाद्य यथायोगं यथारति यथाकदापिवाभक्त्या यत्रकुत्रापिवाकृता ६१ येनकेनापिवादेवि पूजामुक्तिं करिष्यति सदासक्तेनमनसा यत्कृतंपरमेष्ठिनः ६२ यत्रियंचशिवस्येव
क्रमेणव्युत्क्रमेणवा तथापिशिवभक्ताय नान्येनविवशानराः ६३ तेषामर्थोमयादेवि नियमः
परिकल्पितः तत्रादौसंप्रवक्ष्यामि तत्रसंग्रहणंशुभं ६४ यद्विनानिष्फलोजप्ये येनवासफलं
भवेत् आज्ञाहीनेक्रियाहीने श्रद्धाभक्तिविवर्जिते ६५ अजप्यंदक्षिणाहीने सदाजप्येचनि
ष्फले आज्ञासिद्धंक्रियासिद्धं श्रद्धासिद्धक्रियात्मके ६६ तथैवदक्षिणासिद्धं जपसिद्धं ६६

महत्फलं तस्माद्गुरुमुपागम्य नोपायेत्प्रयत्नतः ६७ वाचा च मनसा चैव कायेन द्रविणेन च आ
चार्यं पूजयेद्यत्नाच्छिष्यः सर्वदा देवि यत्नतः ६८ हस्त्यश्वरथरत्नानि क्षेत्राणि च गृहाणि च वासांसि ध
नधान्यानि रत्नानि विविधानि च ६९ सर्वान्नून्गुरवे दद्याद्भक्त्या च विभवे सति वित्तशाठ्यं न कुर्वी
त यदीच्छेत्सिद्धिमात्मनः ७० तस्मान्निवेदयेद्देवि स्वात्मानं सपरिच्छदं एवं संपूज्य विधिवद्यथा
न् शक्तिलवंवयन् ७१ साधयेद्गुरोर्मंत्रे ज्ञानदेवि क्रमेण तु षडध्वशुद्धिमार्गः स्यात् कुर्यादात्मजिगी
षया ७२ ज्ञात्वा गुरुमुखात्सम्यक् ज्ञानार्णवसमुत्तरन् कलातत्वाध्वभुवनं वर्णपदमतः परं ७३
मंत्रश्चेति समासेन षडध्वानः प्रकीर्तिताः देवि तुष्टो गुरुः शिष्यं पूजकं वत्सरोषितं ७४ अभिषि
चस्वल्पं कृत्य दद्यान्मंत्रं शिवात्मकं यं मंत्रमेनमधिगम्य गुरोर्मुज्ञात् कृत्वा षडध्वपरिशोधनपू

+ खा

वंचर्यः ध्यात्वा जपत्यनुदिनं विषयेष्वसक्तः स्तस्याचिरेण परितुष्यति चंद्रमौलिः ७५ साभिषेकं गुरो
र्लब्ध्वा मंत्रदीक्षां च गौरवीं संकल्प्य प्रजपेद्द्विपुरश्चरणपूर्वकं ७६ एकाग्रेण शिवं ध्यात्वा चेतसा वि
जितेंद्रियः यावज्जीवं जपेन्मंत्रमष्टोत्तरसहस्रकं ७७ अनश्ननूनत्परो भूत्वा सयाति परमां गतिं
जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ७८ नक्ताशी संयतमनाः पौरश्चरणिकोमतः तत्पुरश्च
रणं कृत्वा नित्यजापी भवेन्नरः ७९ तस्य नास्ति समो लोके स सिद्धः सिद्धिदो भवेत् स्नानं कृत्वा
शुचौ देशे लब्ध्वा रुचिरमासनं ८० शिवभक्त्या शिवं ध्यात्वा स्वगुरोः संनिधौ हृदि उदङ्मुखः प्राङ्
मुखो वा मौनी चैकाग्रमानसः ८१ विशोध्य पंचतत्वानि दहनाप्लावनादिभिः मंत्रैर्न्यासादि
कं कृत्वा सकलीकृतविग्रहः ८२ अवयोर्धि ग्रहेध्यायेत् प्राणापानौ नियम्य च विद्यास्थानं

परंरूप ऋषिश्छंदस्तु दैवतं ८३ बीजं शक्तिं तथा वाच्यं स्मृत्वा पंचाक्षरं जपेत् उत्तमं मानसं जप्य मुपां
शुर्मध्यमं विदुः ८४ अधमं वाच्यकं प्राहुरागमार्थविशारदाः उत्तमं रुद्रदैवत्यं मध्यमं विष्णुदैवतं ८५
अधमं ब्रह्मदैवत्यं देव्याहुरनुपूर्वशः यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ८६ मंत्रमुच्चारये
द्वाचा वाचकोयं जपः स्मृतः जिह्वामात्रपरिस्पंदं ईषदुच्चारितं शिवे ८७ अपरैरश्रुतं किंचित्छ्रुता
वोपांशुरुच्यते धिया यदक्षरश्रेणिं वर्णाद्वर्णं पदात्पदं ८८ शब्दार्थचिंतनं देवि कथ्यते मानसो ज
पः वाचकं चैकमेकं स्यादुपांशुः शतमुच्यते ८९ सहस्रो मानसः प्रोक्तः सगर्भस्तच्छताधिकः कुं
भकेन समायुक्तः सगर्भो जप उच्यते ९० अध्ये तयोरगर्भोपि प्राणायामः प्रशस्यते चत्वारि शा
त्समावृत्तिः प्राणानायम्य संस्मरेत् ९१ मंत्रं मंत्रार्थविद्धीमान् शक्तिः शक्तिमनो जपेत् अ

६९ गर्भवासगर्भवा सगर्भस्तत्रशिष्यते २२ सगर्भदपि साहस्र: सध्यानोजपउच्यते एषुपंचविधेष्वेक:
कर्तव्य:शक्तितोजप: २३ अंगुल्याजपसंख्याना मेकमेकामुदाहृतं रेखायाष्टगुणं विंद्यात्
पुत्रजीवैर्दशाधिकं २४ शतंस्यात्छंखमणिभि: प्रवालैस्तुसहस्रकं स्फटिकैर्दशसाहस्रंमौक्ति
कैर्लक्षमुच्यते २५ पद्माक्षैर्दशलक्षंतुसौवर्णै:कोटिरुच्यते कुशग्रंथ्याचरुद्राक्षै रनंतगुणितं
भवेत् २६ त्रिंशदक्षै:कृतामाला धनदाजपकर्मणि सप्तविंशतिसंख्यातै रक्षै:पुष्टिप्रदाशिवे २७
पंचविंशतिसंख्यातै: कृतामुक्तिंप्रयच्छति अक्षैस्तुपंचदशभि रभिचारफलप्रदा २८ अंगुष्ठं
मोक्षदंविंद्यात्तर्जनीशत्रुनाशनी मध्यमाधनद:शांतिं कुरुतेनामिकाजपात् २९ कनिष्ठारक्ष ६९
णीप्रोक्ता पुन्नदायविशोषन: अंगुष्ठेनजपंजाप्यं सहान्यंगुलिभि:सदा ३० अंगुष्ठरहितंतप्यं

कृतं तदफलं भवेत् जप्या गृहे समफलं गोष्टे शतगुणं विदुः १ पुण्यारण्ये तथारामे सहस्त्रगुणमुच्य
वि ते आयुतं पर्वतेदिं नद्यां लक्षमुदाहृतं २ कोटिदेवालये देवि अनंतं शिवसंनिधौ सूर्यस्याग्नेर्गु
रोरिंदो दीपस्य च जलस्य च ३ लिंगस्य च गवां चैव सन्निधौ शस्यते जपः पुमान् सदाचाररतो जपे
त्पंचाक्षरीमिमां ४ अस्मिन् नास्ति परं महामंत्रे सर्वसिद्धाग्रिरीद्रजे योजनः कीर्तयेद्भक्त्या शृणुयाद्वा
समाहितः ५ सर्वपापविनिर्मुक्तः स याति मम संनिधिं द्विसहस्रं जपेद्रोगा न्मुच्यते नात्र संशयः ६
त्रिसहस्रं जपेन्मंत्री दीर्घमायुरवाप्नुयात् सहस्रवृत्त्या प्रजपेत् सर्वान्कामानवाप्नुयात् ७ आ
ज्यान्वितैस्तिलैः शुद्धैः हुत्वा लक्षमादरात् उत्पातजनितान् क्लेशान् नाशयेत् सर्वतात्मजे ८
शतलक्षं जपेत्साक्षा च्छिवो भवति मानवः किमत्र बहुनोक्तेन मम रूपं स पार्वति ९ पंचाक्षरी
गो वृत्तं॥

६९ नियमवानपियोजपेत तस्मिन्समाहितमना: शुचिरात्मवश्य: क्षेत्रे शिवस्य परमे भुवि पर्वते वा
व गच्छेत्स शंकरपुरं शिवसन्निकाश: १० इति ते कथितं देवि मनो माहात्म्यमुत्तमं मम पंचाक्षरस्यै
वं किं भूय: श्रोतुमिच्छसि ५५५ इति श्री पारमेश्वरतंत्रे पंचाक्षरीजपानुष्ठानस्वरूपनिरूपणं
नाम एकादश: पटल: ११ श्रीगुरुदत्तावधूत माहाराजकि जै श्रीदशरथात्मजाय नम: श्री



६९

श्रीगजाननायनमः श्रीदेव्युवाच देवदेवमहादेव महेशमृडशंकर ज्ञानयोगस्य माहात्म्यं वदमेकरु
णाकर १ ईश्वर० चर्याचर्याचसनंतं महिंसांज्ञानसंग्रहं सत्यमस्तेयमास्तिक्यं श्रद्धाचेंद्रियविग्रहं २
अध्यापनंचाध्यायनं यजनंयाजनंतथा ज्ञानमीश्वरभावश्च यजनंयाजनंशिवे ३ अंतर्यागंबहि
र्यागंसनतंज्ञानशीलता यएवंवर्जनेयोगी ज्ञानयोगस्यसिद्धये ४ अचिरादेवविज्ञानेनबुध्वायो
गंचविंदति दग्ध्वादेहमिमंज्ञानीक्षणाज्ज्ञानाग्निनाव्ययेन ५ ममप्रसादाद्योगज्ञः कर्मबंधंप्रहास्य
ति पुण्यापुण्यात्मकंकर्ममुक्तेस्तत्फलतिबंधकं ६ तस्माद्योगंनतोयोगीपुण्यापुण्येविवर्जयेत फ
लकामनयाकर्मकरणेप्रतिपद्यते ७ नकर्ममात्रकरणंतस्मात्कर्मफलंत्यजेत प्रथमंकर्मयोगे
न बहिःसंपूज्यशंकरं ८ ज्ञानयज्ञरतोदेवि तस्माद्योगंसमभ्यसेत् विधितश्शिवयात्मेककर्मणा

ज्ञानयोगिनः ९ नयजंति शिवंयुक्ताः समलोष्टाश्मकांचनाः नित्ययुक्तोमहादेवि भक्तिमान्यःसमाहि
तः १० ज्ञानयोगरतोयोगि ममसायुज्यमाप्नुयात् अथाविरक्तश्चित्तांयवर्णिनःशिवमाश्रिताः ११ ज्ञा
नचर्यक्रियाण्येव तस्मिन् कुर्यात्तदार्हता बाह्यमभ्यंतरंचैव बाह्याभ्यंतरमेवच १२ वाङ्मनःकायभेदेन
त्रिधातत्पूजनंविदुः तपःकर्मजपोध्यानं ज्ञानंचत्यनुपूर्वशः १३ पंचधाकथितंरुद्रे तदेवकथितंपुनः
अन्यात्मविधितेबाह्यं बाह्यमभ्यर्चनादिकं १४ तदेवतुसमंवेद्ये तमनोमात्रमुच्यते शिवनामरतावा
णिसायावाणिनिगद्यते १५ लिंगैस्तत्सासनोद्दिष्टैस्त्रिपुंड्रादिभिरंकितः शिवोपचारनिरतःकायःका ७०
योनचेतरः १६ तमर्चाकर्मविज्ञेयं बाह्यं यागादिनोच्यते शिवार्थेदेहसंशोषस्तपःकृच्छ्रादिनोमतं १७
जपःपंचाक्षराभ्यासःप्रणवाभ्यासएवच रुद्राध्यायादिकाभ्यासोनचान्याध्ययनादिके १८ ध्यानं

च शिवचिंतास्या दात्मास्थैर्यं समाश्रयः शिवागमार्थविज्ञानं ज्ञानं चान्यार्थवेदनं १९ बाह्येचवाभ्यंतरेवा
त्रयंस्यान्मनसोरतिः प्राग्वासना वशादेव शिवे निष्ठां समाचरेत् २० बाह्याद्भ्यंतरं [illegible]
श्रेष्ठं भवेच्छतगुणाधिकं असंकरत्वाद्दुष्टानां दोषाणामप्यसंभवात् २१ शौचमभ्यंतरं कुर्यान्नबाह्यं
शौचमुच्यते ततः शौचविमुक्तात्मा शुचिरप्यशुचिर्यतः २२ बाह्यमाभ्यंतरंचैव भजनं भावपूर्वकं न
भावरहितं ग्राह्यं विप्रलंभैककारणं २३ कृतकृत्यस्य तृप्तस्य शिवस्य परमेष्ठिनः नकैः किं क्रियते क
र्मभावमात्रं हि गृह्यते २४ अष्टधा लक्षणं प्राहुः शिवधर्माधिकारिणां येनज्ञेया नरैरन्यै नैराविभ्व
विलक्षणाः २५ शिवभक्तेषु वात्सल्यं पूजायां चानुमोदनं स्वयमभ्यर्चनं चैव तदर्थं चांगचेष्टनं २६ त
त्कथाश्रवणे भक्तिः स्वरनेत्रांगविक्रिया शिवानुस्मरणं नित्यं सर्वथा तदकैतवं ९ तदष्टगुणो विन्द्ये

७१ स्मिन्म्लेच्छेपि दृश्यते सशिवं ह्येयतिः श्रीमान् सम्भुक्तिः सर्वपंडितः समहानुभावपासेवा सा भक्तिरितिक
थ्यते सा पुनर्वीक्ष्यते त्रेधा मनोवाक्काय भेदतः परां भक्तिं समभ्येत्य शिवधर्मरतो नरः परयाचतया भ
क्त्या प्रसादं लभ्यते नरः ३० देवो वा मानवो वापि पशुर्वा विहगोपि वा कीटो वापि क्रिमिर्वापि मुच्य
ते मत्प्रसादतः गर्भस्थो जायमानो वा बालो वा तरुणोपि वा वृद्धो वा म्रीयमाणो वा स्वर्गस्थो वापि ना
रकी पतितोपतितो वापि पंडितो मूढ एव च प्रसन्ने मयि देवेशि मुच्यते भवबंधनात् ३३ अथ ये मानवा
लोके स्वच्छया धृतविग्रहाः भावातिशयसंपन्नाः पूर्वसंस्कारसंयुताः ३४ विरक्ता वानुरक्ता वा स्त्रि
यादिविषयेष्वपि पापेन ते विलिप्यंते पद्मपत्रमिवांभसा तेषां शिवात्मविज्ञाने विशुद्धानां शिवात्म
नां तत्प्रसादविमुक्तानां दुःखमोभ्रमलक्षणं नास्ति कृत्यमकृत्यं च समाधिर्वीपरायणं नविद्य ७१

नैनिषेधश्च ममसाम्य: स्याद्विजे यथैवपरिपूर्णस्य साध्यंममनविद्यते तथैवकृतकृत्यानां तेषामपि
नसंशय: शिवभक्तहितार्थं ते मानुषंभावमाश्रिता: रुद्रलोकात्परिभ्रष्टास्तेरुद्रानात्रसंशय: शिवानु
शासनंयद्वद्ब्रह्मादीनां प्रवर्तकं तद्वत्तरेषामन्येषांतन्नियोग:प्रवर्तक: ४० यथावह्निसमावेशाद्यो
भवतिकेवलं तथैवशिवसान्निध्यान्नातेकेवलमानुषा: तपस्तपादिसाधर्म्यंरुद्रधर्मवपुर्धरान् प्राज्ञ
स्तान्यवमन्वानो नावजानीतपंडित: अवज्ञानंकृतंतेषां नरैर्वीमूढमानसै: आयु:श्रियंकुलंशीलं ह
